घ्राणेन्द्रियेण गन्धज्ञानं जायते। अतः घ्राणेन्द्रियं जनकं। गन्धज्ञान जन्यं। जनकता घ्राणेन्द्रियनिष्ठा। जन्यता गन्धज्ञाननिष्ठा। घ्राणेन्द्रियनिष्ठ जनकतायाः गन्धज्ञाननिष्ठ जन्यतायाः च निरूपितत्वं संबन्धः। घ्राणेन्द्रियनिष्ठ जनकता निरूपित जन्यतावत् गन्धज्ञानं।

इदं
अस्य ज्ञानस्य गन्धः विषयः। ज्ञानं विषयि। विषयिता गन्धज्ञाननिष्ठा। विषयता गन्धनिष्ठा। गन्धज्ञाननिष्ठ विषयितायाः गन्धनिष्ठ विषयतायाश्च

1992	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa
MAY	—	—	—	—	—	1	2	3	4	5	6	7	8	9	10	11	12	13	14	15	16
	17	18	19	20	21	22	23	24	25	26	27	28	29	30	31	—	—	—	—	—	—

APRIL 30 Thursday

निरूपितत्वं सम्बन्धः। गन्धज्ञान
निष्ठ विषयिता निरूपित विषयता वान्
गन्धः विषयतावत्वं गन्धे वर्तते इति
प्रथम दलं।
गन्धः गुणः। अतः गुणत्वं गन्धे
वर्तते इति द्वितीय दलं।

गुणत्वं गन्धस्य लक्षणं इत्येवोक्ते
रूपे अतिव्याप्तिः तस्यापि गुणत्वात्।
तत्परिहारार्थं प्रथम दलं देयं।
रूपे घ्राणेन्द्रिय ज्ञानविषयत्वं नास्ति
इति घ्राणेन्द्रियजन्यज्ञान विषयत्व रूप
विशेषणाभावात् विशिष्टलक्षणाभावः इति न
अतिव्याप्तिः

तर्हि घ्राणेन्द्रिय जन्यज्ञानविषयत्वं
गन्धस्य लक्षणं इत्येवोक्ते गुणत्वरूप
विशेषस्य परित्यागे गन्धत्वे गन्धाभाव
च अतिव्याप्तिः।
यथाहि येनेन्द्रियेण या व्यक्तिः गृह्यते
तेनेन्द्रियेण तन्निष्ठा जातिः तदभाववापि
गृह्यते इति नियमात् सौरभ

घ्राणेन्द्रियज्ञान विषयत्वं गन्धत्वे
गन्धाभावेऽपि वर्तते इति अतिव्याप्तिः
तत्परिहारार्थं गुणत्वरूप विशेष्यं
देयं।

गन्धत्वं सामान्ये (जातौ) अन्तर्गतं
गन्धाभावस्तु अभावपदार्थे अन्तर्गतः
तयोः गुणत्वं नास्ति इति
विशेष्याभावात् विशिष्ट लक्षणाभावः
इति न अतिव्याप्तिः।

17-5-98. स्पर्शस्य लक्षणं. 73

त्वगिन्द्रियमात्रग्राह्यो गुणः स्पर्शः। स च त्रिविधः शीतोष्णानुष्णाशीत भेदात्। पृथिव्यप्तेजोवायुवृत्तिः। तत्र शीतो जले। उष्णस्तेजसि। अनुष्णाशीतः पृथिवीवाय्वोः।

त्वगिन्द्रियनिष्ठजनकतानिरूपितजन्यतावद्ज्ञाननिष्ठविषयितानिरूपितविषयतावत्त्वे सति त्वगिन्द्रियभिन्नेन्द्रियनिष्ठजनकतानिरूपितजन्यतावद्ज्ञाननिष्ठविषयितानिरूपितविषयताभाववत्त्वे सति गुणत्वं स्पर्शस्य लक्षणं।

(1) त्वगिन्द्रियेण स्पर्शज्ञानं जायते। अतः त्वगिन्द्रियं जनकं। स्पर्शज्ञानं जन्यं। जनकता त्वगिन्द्रियनिष्ठा। जन्यता स्पर्शज्ञाननिष्ठा। एवं च त्वगिन्द्रियनिष्ठजनकतायाः स्पर्शज्ञाननिष्ठजन्यतायाश्च निरूपितत्वं संबन्धः। एवं च त्वगिन्द्रियनिष्ठजनकतानिरूपितजन्यतावत् स्पर्शज्ञानं। अस्य ज्ञानस्य स्पर्शज्ञानं विषयि।

74

स्पर्शः विषयः। विषयिता स्पर्शज्ञान-
निष्ठ। विषयता स्पर्शनिष्ठ। स्पर्श-
ज्ञाननिष्ठ विषयितायाः स्पर्शनिष्ठ
विषयतायाश्च निरूपितत्वं संबन्धः।
स्पर्शज्ञाननिष्ठविषयिता निरूपित
विषयतावान् स्पर्शः। ---विषयतावत्वं
स्पर्शे वर्तते इति प्रथम दलं।

(2) त्वगभिन्नेन्द्रियं चक्षुरिन्द्रियं।
त्वगभिन्नेन्द्रियेण रूपज्ञानं जायते।
तस्य ज्ञानस्य रूपं विषयं, न तु
स्पर्शः। एवं त्वगभिन्नेन्द्रियनिष्ठ
जनकता निरूपित जन्यतावद् ज्ञाननिष्ठ
विषयिता निरूपित विषयता स्पर्शे
नास्ति इति विषयताभाववत्वं
स्पर्शे आयातं इति द्वितीय दलं।

(3) स्पर्शः गुणः। अतः गुणत्वं
स्पर्शे वर्तते इति तृतीय दलं इति
लक्षण समन्वयः।

गुणत्वं स्पर्शस्य लक्षणं इत्येवोक्ते
चक्षुरादिषु अतिव्याप्तिः तेषां अपि
गुणत्वात्। तत्परिहारार्थं प्रथमदलं देयं।
चक्षुरादिषु त्वगिन्द्रियजन्य ज्ञान
विषयत्व रूप विशेषणाभावात् विशिष्ट
लक्षणाभावः। अतः न अतिव्याप्तिः।

तर्हि त्वगिन्द्रियजन्य ज्ञानविषयत्वं
स्पर्शस्य लक्षणं इत्येवोक्ते गुणत्व
रूप विशेषस्य परित्यागे स्पर्शत्वे
स्पर्शाभावे च अतिव्याप्तिः।

तथाहि — येनेन्द्रियेण या जातिः
गृह्यते तेनेन्द्रियेण तन्निष्ठा जातिः
तदभावोऽपि गृह्यते इति नियमानुसारेण
त्वगिन्द्रियजन्य ज्ञानविषयत्वं स्पर्शत्वे
स्पर्शाभावे च वर्तते इति अतिव्याप्तिः
तत्परिहारार्थं गुणत्व रूप विशेष्य
देयं।

स्पर्शत्वं सामान्ये (जातौ) अन्तर्गतं
स्पर्शाभावस्तु अभावपदार्थे अन्तर्गतः

६ 4-10-98

6 MAY
Wednesday

1992	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa
APR	—	—	—	1	2	3	4	5	6	7	8	9	10	11	12	13	14	15	16	17	18
	19	20	21	22	23	24	25	26	27	28	29	30	—	—	—	—	—	—	—	—	—

तयोः गुणत्वं नास्तीति विशेष्याभावात् विशिष्टलक्षणाभावः इति न अतिव्याप्तिः।

तथापि अस्य लक्षणस्य त्वगिन्द्रियजन्य-ज्ञानविषयत्वे सति गुणत्व इत्याकारक लक्षणस्य संख्यायां अतिव्याप्तिः।

त्वगिन्द्रियेण संख्याविषयकज्ञानं जायते। अस्य ज्ञानस्य संख्या विषयः। त्वगिन्द्रिय-जन्य ज्ञानविषयत्वं संख्यायां वर्तते इति प्रथमदलं। संख्या तु गुणः। अतः गुणत्वं संख्यायां आयाति इति अतिव्याप्तिः। तत्परिहारार्थं द्वितीय दलं देयं।

द्वितीयदलं संख्यायां नास्ति। कुतः इति चेत् त्वग्भिन्नं चक्षुरिन्द्रियं। त्वग्भिन्नं चक्षुरिन्द्रियजन्य ज्ञानस्य संख्या विषयः। न तु अविषयः।

एवं च संख्यायां त्वग्भिन्नचक्षुरिन्द्रिय जन्य ज्ञानविषयत्वमेव वर्तते, न तु ज्ञानविषयत्वाभावरूप द्वितीयदलं इति न अतिव्याप्तिः।

तर्हि बहिरिन्द्रियजन्यज्ञानविषयत्वे सति गुणत्वे इत्येवोक्ते धर्माधर्मादिषु अतिव्याप्तिः।

धर्माधर्मादीनां ~~अपि~~ अतीन्द्रियत्वेन बहिरिन्द्रियजन्यज्ञानविषयत्वं अपि नास्ति इति बहिरिन्द्रियजन्यज्ञानविषयत्वाभावः वर्तते। तत्र धर्माधर्मादिषु गुणत्वमपि वर्तते इति अतिव्याप्तिः तत्परिहारार्थं प्रथमदलं देयम्।

धर्माधर्मादीनां अतीन्द्रियत्वेन बहिरिन्द्रियजन्यज्ञानविषयत्वं नास्ति इति विशेषणाभावात् विशिष्टलक्षणाभावः।

रूपादिचतुष्टयं पृथिव्यां पाकजमनित्यं च। अन्यत्रापाकजं नित्यमनित्यं च। नित्यगतं नित्यम्। अनित्यगतमनित्यम्।

[illegible]

[illegible]

[illegible]

1992	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa
APR	–	–	–	1	2	3	4	5	6	7	8	9	10	11	12	13	14	15	16	17	18
	19	20	21	22	23	24	25	26	27	28	29	30	–	–	–	–	–	–	–	–	–

ಬದಲಾಗುತ್ತಾ ಹೋಗುತ್ತದೆ. ಆದರೆ ಜಲ ನೆಲವನ್ನು ವಾಯುಗಳನ್ನು ಕಾಲದಿಂದ ಬದಲಿಸುವುದಿಲ್ಲ. ಆದರೂ ಈ ನಿತ್ಯವಾದ ಜಲ, ನೆಲವನ್ನು, ವಾಯುಗಳನ್ನು ಅಂದರೆ ಜಲ ಪರಮಾಣು, ನೆಲವನ್ನು ಪರಮಾಣು, ವಾಯುವಿನ ಪರಮಾಣುಗಳಲ್ಲಿರತಕ್ಕಂತಹ ರೂಪಾದಿಗಳು ಬದಲಾಗುವುದಿಲ್ಲ. ಆದರೆ ನಿತ್ಯವಾದಂತಹ ಪರಮಾಣುವಿನಲ್ಲಿರತಕ್ಕಂತಹ ರೂಪಾದಿಗಳು ನಿತ್ಯವಾಗಿವೆ.

ಉದಾಹರಣೆಗೆ:– अभास्वरशुक्लं जले

ಜಲದ ಪರಮಾಣುವಿನಲ್ಲಿ ಇರತಕ್ಕ ರೂಪಾದಿಗಳು ನಿತ್ಯ. ಏಕೆಂದರೆ ಪರಮಾಣುವಿಗೆ ನಾಶವಾಗುವುದಿಲ್ಲ. ಅನಿತ್ಯವಾದ ದ್ವ್ಯಣುಕಾದಿಗಳಲ್ಲಿರತಕ್ಕ ರೂಪಾದಿಗಳು ಅನಿತ್ಯವಾಗಿವೆ. ಏಕೆಂದರೆ ದ್ವ್ಯಣುಕಾದಿಗಳು ನಾಶವಾಗುವುದರಿಂದ.

संख्यायाः लक्षणं।

19

MAY 9 Saturday

1992	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa
JUN	—	1	2	3	4	5	6	7	8	9	10	11	12	13	14	15	16	17	18	19	20
	21	22	23	24	25	26	27	28	29	30	—	—	—	—	—	—	—	—	—	—	—

एकत्वादिव्यवहारहेतुः संख्या। सा नवद्रव्यवृत्तिः। एकत्वादिपरार्धपर्यन्ता। एकत्वं नित्यमनित्यं च। नित्यगतं नित्यम् अनित्यगतमनित्यम्। द्वित्वादिकं तु सर्वत्राऽनित्यमेव।

एकत्वादिव्यवहारनिष्ठकार्यतानिरूपितकारणतावत्वे सति गुणत्वं संख्यायाः लक्षणं

अयं एकः, इमौ द्वौ, इमे त्रयः इत्याकारक व्यवहारं प्रति संख्या कारणं। कारणता संख्यानिष्ठा। कार्यता व्यवहारनिष्ठा। व्यवहारनिष्ठकार्यतायाः संख्यानिष्ठ कारणतायाश्च निरूपितत्वं संबन्धः। एवं च व्यवहारनिष्ठकार्यतानिरूपित कारणतावती संख्या। कारणतावत्वं संख्यायां वर्तते इति लक्षणसमन्वयः।

MAY 10 Sunday

९० परिमाणस्य लक्षणं

11 MAY Monday

1992	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa
APR	—	—	—	1	2	3	4	5	6	7	8	9	10	11	12	13	14	15	16	17	18
	19	20	21	22	23	24	25	26	27	28	29	30	—	—	—	—	—	—	—	—	—

मानव्यवहारासाधारणकारणं परिमाणम्
नवद्रव्यवृत्ति। तच्चतुर्विधम् - अणु
महत् दीर्घं ह्रस्वं चेति।

मानव्यवहारनिष्ठ कार्यतानिरूपित कारणतावत्वे
सति गुणत्व परिमाणस्य लक्षणं।
अणुः अणू अणवः
अणुं अणूनी अणूनि
अण्वी अण्वौ अण्वः।

॥ पृथक्त्वस्य लक्षणं ॥

81

पृथग्व्यवहारासाधारणकारणं पृथक्त्वम् सर्वद्रव्यवृत्ति ।

पृथक् इति व्यवहारः । व्यवहारस्य असाधारणकारणं ।

इदं अस्मात् पृथक् इत्याकारक व्यवहारं प्रति पृथक्त्वं कारणं । कारणता पृथक्त्वनिष्ठा । कार्यता व्यवहारनिष्ठा । व्यवहारनिष्ठकार्यतानिरूपित पृथक्त्वनिष्ठ कारणतायाश्च निरूपितत्वं संबन्धः एवं च व्यवहारनिष्ठकार्यता निरूपित कारणतावान् पृथक्त्वं । कारणतावत्व पृथक्त्व वर्तते इति लक्षण समन्वयः

संयोगस्य लक्षणं ॥

संयुक्तव्यवहारहेतुः संयोगः।
सर्वद्रव्यवृत्तिः।

[illegible]

अयं अनेन संयुक्तः इत्याकारक व्यवहारं प्रति संयोगः कारणं। कारणता संयोगनिष्ठा। कार्यता व्यवहारनिष्ठा व्यवहारनिष्ठकार्यतायाः संयोगनिष्ठकारणतायाश्च निरूपितत्वं सम्बन्धः। एवं च व्यवहारनिष्ठकार्यतानिरूपितकारणतावान् संयोगः। कारणतावत्त्वं संयोगे वर्तते इति लक्षणसमन्वयः॥

विभागस्य लक्षण

संयोगनाशको गुणो विभागः।
सर्वद्रव्यवृत्तिः।

संयोगनिष्ठप्रतियोगितानिरूपकध्वंसनिष्ठ
कार्यतानिरूपित कारणतावत्वे सति
गुणत्वं विभागस्य लक्षणं ॥

विभागेन संयोगः नश्यते। अस्य
नाशस्य संयोगः प्रतियोगी। प्रतियोगिता
संयोगनिष्ठ। संयोगनिष्ठप्रतियोगितायाः
ध्वंसः निरूपकः। अयं ध्वंसः कार्यः
विभागः कारणं। एवं च कारणता
विभागनिष्ठ कार्यता ध्वंसनिष्ठ।
ध्वंसनिष्ठकार्यतायाः विभागनिष्ठ
कारणतायाश्च निरूपितत्वं संबन्धः।
एवं च संयोगनिष्ठप्रतियोगितानिरूपक
ध्वंसनिष्ठकार्यतानिरूपित कारणतावान्
विभागः। ... कारणतावत्वं विभागे वर्तते
इति प्रथमदल समन्वयः।

विभागे गुणत्वं वर्तते इति द्वितीयदल
समन्वयः॥

परापरव्यवहाराऽसाधारणकारणे
परत्वापरत्वे। पृथिव्यादिचतुष्टयमनो
वृत्तिनी। ते च द्विविधे - दिक्कृते
कालकृते चेति। दूरस्थे दिक्कृतं परत्वम्।
समीपस्थे दिक्कृतमपरत्वम्। ज्येष्ठे
कालकृतं परत्वम्। कनिष्ठे कालकृतमपरत्वम्

परापरव्यवहारनिष्ठकार्यता निरूपित
कारणतावत्त्वे सति गुणत्वं परत्वापरत्वयोः
लक्षणं।
अयं परः, अयं अपरः इत्याकारक
व्यवहारं प्रति परत्वापरत्वे कारणे।
कार्यता व्यवहारनिष्ठा। कारणता परत्वा-
परत्वनिष्ठा। एवं च व्यवहारनिष्ठ
कार्यतायाः परत्वापरत्वनिष्ठ कारणता-
याश्च निरूपितत्वं सम्बन्धः।

एवं च परापरव्यवहारनिष्ठ कार्यता
निरूपित कारणतावती परत्वापरत्वे।
कारणतावत्त्व परत्वापरत्वयोः वर्तते
इति लक्षणसमन्वयः

ನನ್ನ ಸಮೀಪದಲ್ಲಿರುವ ಪದಾರ್ಥವು ಅಪರ (ಧಿಸ್ ನಿಯರ್), ದೂರದಲ್ಲಿರುವ ಪದಾರ್ಥವು ಪರ (ಧ್ಯಾಟ್ ಯಾನ್). ~~ಇಲ್ಲಿ~~ ಇಲ್ಲಿ ಸಮೀಪದಲ್ಲಿರುವ ಪದಾರ್ಥದ ದೆಸೆಯಿಂದ ಪರತ್ವವು ದೂರದಲ್ಲಿರುವ ಪದಾರ್ಥಕ್ಕೆ ಇರುತ್ತದೆ. ಅದರಂತೆ ದೂರದಲ್ಲಿರುವ ಪದಾರ್ಥದ ದೆಸೆಯಿಂದ ಅಪರತ್ವವು ಸಮೀಪದಲ್ಲಿರುವ ಪದಾರ್ಥಕ್ಕೆ ಇರುತ್ತದೆ, ನಾವು ಬುದ್ಧಿಸ್ಥರು.

गुरुत्वस्य लक्षणं ।

आद्यपतनासमवायिकारणं गुरत्वम्
पृथिवीजलवृत्ति ।

आद्यपतननिष्ठ समवायसंबन्धावच्छिन्न
कार्यता निरूपित समवायसंबन्धावच्छिन्न
कारणतावत्वं गुरुत्वस्य लक्षणं ।

फलं वृक्षात् पतति गुरुत्वात् इत्यत्र
आद्यपतनं कार्यं । गुरुत्वं कारणं ।
आद्यपतनं फले क्रियाक्रियावतोः समवायः
इति नियमानुसारेण समवायसंबन्धेन
वर्तते । एवं च कार्यता आद्यपतननिष्ठ
समवायसंबन्धावच्छिन्न ।

गुणगुणिनोः समवायः इति नियमानु-
सारेण गुरुत्वं फले समवायसंबन्धेन
वर्तते । कारणता गुरुत्वनिष्ठ समवाय-
संबन्धावच्छिन्न ।

एवं च आद्यपतननिष्ठ समवाय-
संबन्धावच्छिन्न कार्यतायाः,

गुरुत्वनिष्ठ समवायसंबन्धावच्छिन्न कारणतायाश्च निरूपितत्वं संबन्धः।

एवं च आद्यपतननिष्ठ समवायसंबन्धावच्छिन्न कार्यतानिरूपित, समवाय-संबन्धावच्छिन्न कारणतावत् गुरुत्वं। कारणतावत्वं गुरुत्वे वर्तते इति लक्षण समन्वयः।

① ಗುರುತ್ವವು ಸಮವಾಯ ಸಂಬಂಧದಿಂದ ಘಟದಲ್ಲಿದ್ದು ಆದ್ಯಪತನಕ್ಕೆ ಕಾರಣವಾಗಿದೆ.

② ಪತನ ಕ್ರಿಯೆಯು ಘಟದಲ್ಲಿ ಸಮವಾಯ ಸಂಬಂಧದಿಂದ ಇದ್ದು ಕಾರ್ಯವಾಗಿದೆ.

38

द्रवत्वस्य लक्षणं

20 MAY Wednesday

1992	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa
APR	—	—	—	1	2	3	4	5	6	7	8	9	10	11	12	13	14	15	16	17	18
	19	20	21	22	23	24	25	26	27	28	29	30	—	—	—	—	—	—	—	—	—

आद्यस्यन्दनासमवायिकारणं द्रवत्वम्। पृथिव्यप्तेजोवृत्ति। तद्द्विविधम् — सांसिद्धिकं नैमित्तिकं च। सांसिद्धिकं जले। नैमित्तिकं पृथिवीतेजसोः।

पृथिव्यां घृतादावग्निसंयोगजं द्रवत्वम्। तेजसि सुवर्णादौ।

आद्यस्पन्दननिष्ठ समवायसंबन्धावच्छिन्न कार्यतानिरूपित समवायसंबन्धावच्छिन्न कारणतावत्वं द्रवत्वस्य लक्षणं।

जलं स्पन्दति द्रवत्वात्। आद्यस्पन्दनं कार्यं। द्रवत्वं कारणं। आद्यस्पन्दनं जले क्रियाक्रियावतोः समवायः इति नियमानुसारेण समवायसंबन्धेन वर्तते।

द्रवत्वमपि जले गुणगुणिनोः समवायः इति नियमानुसारेण समवायसंबन्धेन वर्तते।
एवं च कार्यता आद्यस्पन्दननिष्ठ समवायसम्बन्धावच्छिन्ना। कारणता

के २१०

89

1992	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa
JUN	—	1	2	3	4	5	6	7	8	9	10	11	12	13	14	15	16	17	18	19	20
	21	22	23	24	25	26	27	28	29	30	—	—	—	—	—	—	—	—	—	—	—

MAY 21 Thursday

द्रवत्वनिष्ठ समवायसंबन्धावच्छिन्न ।

एवं च आद्यस्यन्दननिष्ठ समवाय-
सम्बन्धावच्छिन्न कार्यतायाः द्रवत्वनिष्ठ
समवायसम्बन्धावच्छिन्न कारणतायाश्च
निरूपितत्वं सम्बन्धः ।

एवं च आद्यस्यन्दननिष्ठ समवाय-
सम्बन्धावच्छिन्न कार्यतानिरूपित
समवायसम्बन्धावच्छिन्न कारणतावत्
द्रवत्वं । कारणतावत्वं द्रवत्वे वर्तते
इति लक्षण समन्वयः ।

स्नेहस्य लक्षणं

चूर्णादिपिण्डीभाव हेतुर्गुणः स्नेहः।
जलमात्र वृत्तिः।

चूर्णादिपिण्डीभावनिष्ठ कार्यता निरूपित कारणतावत्वं स्नेहस्य लक्षणं।

चूर्णादिपिण्डीभावः कार्यः। स्नेहः कारणं। कार्यता चूर्णादिपिण्डीभावनिष्ठ, कारणता स्नेहनिष्ठा।

चूर्णादिपिण्डीभावनिष्ठ कार्यतायाः स्नेहनिष्ठ कारणतायाश्च निरूपितत्वं सम्बन्धः। एवं च चूर्णादिपिण्डीभाव निष्ठ कार्यता निरूपित, कारणतावान् स्नेहः। कारणतावत्वं स्नेहे वर्तते इति लक्षणासमन्वयः।

शब्दस्य लक्षणं

[illegible] 91

1992	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa
JUN	—	1	2	3	4	5	6	7	8	9	10	11	12	13	14	15	16	17	18	19	20
	21	22	23	24	25	26	27	28	29	30	—	—	—	—	—	—	—	—	—	—	—

MAY 23 Saturday

श्रोत्रग्राह्यो गुणः शब्दः। आकाशमात्र वृत्तिः। स द्विविधः। ध्वन्यात्मको वर्णात्मकश्च। तत्र ध्वन्यात्मको भेर्यादौ। वर्णात्मकः संस्कृतभाषादिरूपः।

श्रोत्रेन्द्रियनिष्ठ जनकतानिरूपित जन्यतावद् ज्ञाननिष्ठ विषयितानिरूपित विषयतावत्वे सति गुणत्वं शब्दस्य लक्षणं।

श्रोत्रेन्द्रियेण शब्दज्ञानं जायते इति श्रोत्रेन्द्रियं जनकं शब्दज्ञानं जन्यं। जनकता इन्द्रियनिष्ठा, जन्यता शब्दज्ञाननिष्ठ।

MAY 24 Sunday

एवं च इन्द्रियनिष्ठजनकतायाः, शब्दज्ञाननिष्ठजन्यतायाश्च निरूपितत्वं सम्बन्धः। एवं च श्रोत्रेन्द्रियनिष्ठ जनकतानिरूपित जन्यतावत् शब्दज्ञानं।

अस्मिन् ज्ञाने शब्दः विषयः। ज्ञानं विषयि। विषयिता ज्ञाननिष्ठा। विषयता शब्दनिष्ठा। एवं च शब्दज्ञाननिष्ठ

विषयितायाः शब्दनिष्ठ विषयतायाश्च
निरूपितत्व सम्बन्धः।

एवं च श्रोत्रेन्द्रियनिष्ठ जनकता-
निरूपित जन्यतावद् ज्ञाननिष्ठ
विषयिता निरूपित विषयतावान् शब्दः।
विषयतावत्वं शब्दे वर्तते इति
लक्षण समन्वयः।

(बुद्धिः) ॥बुद्धेः लक्षणं॥ 93

1992	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa
JUN	—	1	2	3	4	5	6	7	8	9	10	11	12	13	14	15	16	17	18	19	20
	21	22	23	24	25	26	27	28	29	30	—	—	—	—	—	—	—	—	—	—	—

MAY 26 Tuesday

सर्वव्यवहारहेतुर्गुणो बुद्धिर्ज्ञानम्
सा द्विविधा - स्मृतिरनुभवश्च।

सर्वव्यवहारनिष्ठ कार्यता निरूपित
कारणतावत्वे सति गुणत्वं बुद्धेः लक्षणं

सर्वव्यवहारः कार्यः। कार्यता व्यवहारनिष्ठा।
बुद्धिः कारणं। कारणता बुद्धिनिष्ठा।।
सर्वव्यवहारनिष्ठ कार्यतायाः बुद्धि
निष्ठ कारणतायाश्च निरूपितत्वं संबन्धः

एवं च सर्वव्यवहारनिष्ठ कार्यतानिरूपित
कारणतावती बुद्धिः।...कारणतावत्वं
बुद्धौ वर्तते इति लक्षण समन्वयः।

1992	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa
APR	—	—	—	1	2	3	4	5	6	7	8	9	10	11	12	13	14	15	16	17	18
	19	20	21	22	23	24	25	26	27	28	29	30	—	—	—	—	—	—	—	—	—

संस्कारमात्रजन्यं ज्ञानं स्मृतिः।

संस्कारः एव संस्कारमात्रं। संस्कारमात्रेण जन्यं, संस्कारमात्रजन्यं।

लक्षणं तु (संक्षेपरूप) संस्कारजन्यत्वे सति संस्कारेतराजन्यत्वे सति ज्ञानत्वं।

विस्तार रूप :— संस्कारनिष्ठ जनकता निरूपित जन्यतावत्वे सति संस्कारनिष्ठ प्रतियोगिता निरूपक भेदवन्निष्ठ जनकता निरूपित जन्यत्वाभाववत्वे सति ज्ञानत्वं स्मृतेः लक्षणं।

ಸಂಸ್ಕಾರದ ಪರಿಣಾಮದ ಭಿನ್ನವಾದ
ಪ್ರತ್ಯಭಿಜ್ಞಾನದ ಸ್ಮರಣೆ [illegible].

संस्कारेण स्मरणं जायते। अतः संस्कारः जनकः। स्मरणं जन्यं। जनकता संस्कारनिष्ठ। जन्यता स्मरणनिष्ठा। संस्कारनिष्ठ जनकतायाः स्मरणनिष्ठजन्यतायाश्च निरूपितत्वं संबन्धः एवं च संस्कारनिष्ठ जनकतानिरूपित

जन्यतावत् स्मरणं। जन्यतावत्वं स्मरणे वर्तते इति प्रथमदलं।

संस्कारेतरः प्रत्यक्षादिभिः स्मरणं न जायते। संस्कारेतरः प्रत्यक्षादिः। प्रत्यक्षादिः प्रत्यक्षात्मकज्ञानं प्रति जनकः ज्ञानं जन्यं। जनकता संस्कारनिष्ठ प्रतियोगितानिरूपक भेदवन्निष्ठ। जन्यता ज्ञाननिष्ठ। संस्कारनिष्ठप्रतियोगितानिरूपक भेदवन्निष्ठ जनकतायाः ज्ञाननिष्ठ जन्यतायाश्च निरूपितत्वं सम्बन्धः।

एवं च संस्कारनिष्ठ प्रतियोगितानिरूपक भेदवन्निष्ठ जनकतानिरूपित जन्यता प्रत्यक्षादि ज्ञाने वर्तते। न तु स्मरणे वर्तते। किं तु जन्यताभावः स्मरणे वर्तते इति जन्यताभाववत्वरूपं द्वितीय दलं। अस्मिन् ज्ञाने ज्ञानत्वं वर्तते इति तृतीय दलं।

(1) संस्कारेतरः (2) संस्कारभिन्नः (3) संस्कारनिष्ठ प्रतियोगिता निरूपक भेदवान्।

(१) प्रत्यक्षात्मक ज्ञानस्य प्रत्यक्षं जनकं
(२) अनुमित्यात्मक ज्ञानस्य अनुमानं जनकं
(३) उपमित्यात्मक ज्ञानस्य उपमानं जनकं
(४) शाब्दबोधात्मक ज्ञानस्य शब्दः जनकः ॥)

अनुभवस्य लक्षणं

तद्भिन्नं ज्ञानमनुभवः । सः द्विविधः — यथार्थोऽयथार्थश्च ।
तस्याः (स्मृत्याः) भिन्नं = तद्भिन्नं ।

स्मृतिभिन्नत्वे सति ज्ञानत्वं अनुभवस्य लक्षणं ।

स्मृतिनिष्ठ प्रतियोगितानिरूपकभेदवत्वे सति ज्ञानत्वं अनुभवस्य लक्षणं ।

अनुभवः स्मृतिः न । एवं च अनुभवे स्मृति सकाशात् भेदः वर्तते । भेदस्य प्रतियोगी स्मृतिः । प्रतियोगिता स्मृतिनिष्ठा । स्मृतिनिष्ठ प्रतियोगितया निरूपकः भेदः । तादृश भेदवान् अनुभवः । तादृश भेदवत्वं अनुभवे वर्तते इति लक्षण समन्वयः ।

यथार्थानुभवस्य लक्षणं।

तद्वति तत्प्रकारकोऽनुभवो यथार्थः। यथा-रजते 'इदं रजतमिति ज्ञानम्।
सैव प्रमेत्युच्यते।

प्रकारीभूत धर्म निष्ठाधेयतानिरूपिताधिकरणता-वच्छिन्न विशेष्यतानिरूपकत्वे सति पूर्वोक्त-धर्मनिष्ठ प्रकारतानिरूपकत्वे सति ज्ञानत्वं

यथा रजते "इदं रजतं" इति ज्ञानं तत्र अस्य लक्षणस्य समन्वयः।

अस्मिन् ज्ञाने इदं पदार्थः विशेष्यः, रजतत्वं प्रकारः। रजतत्वं इदं पदार्थे वर्तते इति इदं पदार्थः अधिकरणं। रजतत्वं आधेयः। रजतत्वमेव प्रकारीभूत धर्मः।
एवं च आधेयता प्रकारीभूतधर्मनिष्ठा, अधिकरणता इदं पदार्थनिष्ठा।
प्रकारीभूत धर्मनिष्ठाधेयतायाः, इदं पदार्थ निष्ठाधिकरणतायाश्च निरूपितत्वं संबन्धः।
एवं च प्रकारीभूत धर्मनिष्ठाधेयतानिरूपित

श्री

अधिकरणतावान् इदं पदार्थः । सः एव
अस्मिन् ज्ञाने विशेष्यः । विशेष्यता
अधिकरणतावन्निष्ठा । विशेष्यतया
निरूपकं इदं रजतं इत्याकारक ज्ञानं ।
निरूपकत्वं इदं रजतं इत्याकारक ज्ञाने
वर्तते इति प्रथम दलं ।

अथ पूर्वोक्त धर्मः (रजतत्वं) अस्मिन्
ज्ञाने प्रकारः । प्रकारता पूर्वोक्तधर्मनिष्ठा
प्रकारतया निरूपकं इदं रजतं इत्याकारक
ज्ञानं इति द्वितीय दलं ।

अस्मिन् ज्ञाने (इदं रजतं इत्याकारक ज्ञाने)
ज्ञानत्वं अपि वर्तते इति तृतीय दलं ।

ಉದ್ಬುದ್ಧಃ
(ಸಂಸ್ಕಾರಸ್ಯ (~~ಉದ್ಬೋಧಃ~~) ನಾಶಃ ಪದಾರ್ಥ ದರ್ಶನಾದಿ
ಸಹಕಾರಿ ಲಾಭಃ॥ (ವೈ.ಭಾ. 3 ನೆ ಪ್ರಕರಣ 28 20
ನೆ ಪೇಜ್)
(ಪದಾರ್ಥ ಅದೃಷ್ಟ ಚಿಂತಾದ್ಯಾಃ ಸ್ಮೃತಿ ಬೀಜಸ್ಯ –
ಬೋಧಕಾಃ)
(ಅನುಭವ ಲೇಶ = ಪ್ರತ್ಯಕ್ಷವನ್ನು ಅನಾಧಾರ
ಹೇಳಿದ ಪ್ರತ್ಯಕ್ಷವು)
→ ಜ್ಞಾನ

9-10-98 99

अयथार्थानुभवस्य लक्षणं :-

तदभाववति तत्प्रकारकोऽनुभवोऽयथार्थः।
यथा - शुक्तौ "इदं रजतमिति ज्ञानम्।
सैवाऽप्रमेत्युच्यते।

तस्य अभावः तदभावः। तदभावः अस्मिन् अस्तीति तदभाववान्। तस्मिन् तदभाववति। सः प्रकारः यस्मिन् तत् तत्प्रकारकं। तत्प्रकारकं च तत् ज्ञानं च = तत्प्रकारक ज्ञानं - ज्ञानस्य भावः ज्ञानत्वं।

ಯಾವ ಧರ್ಮವು ಇಲ್ಲ (ಯಾವ ಪದಾರ್ಥದಲ್ಲಿ ಇಲ್ಲವೋ), ಆ ಪದಾರ್ಥದಲ್ಲಿ ಆ ಧರ್ಮವಿದೆ ಎಂದು ತಿಳಿಯುವಂತಹ ಜ್ಞಾನವು ಅಯಥಾರ್ಥ ಜ್ಞಾನವೇ.

प्रकारीभूतधर्मनिष्ठ प्रतियोगिता निरूपकाभाववन्निष्ठाधेयतानिरूपिताधिकरणतावच्छिन्न विशेष्यतानिरूपकत्वे सति, पूर्वोक्तधर्मनिष्ठ प्रकारतानिरूपकत्वे सति, ज्ञानत्वं अयथार्थ ज्ञानत्वं।

शुक्तिकां दृष्ट्वा इदं रजतं इत्याकारक ज्ञानं। तत्र अस्य लक्षणस्य समन्वयः अस्मिन् ज्ञाने इदं पदार्थः विशेष्यः। रजतत्व प्रकारः। रजतत्वं इदं पदार्थे नास्ति इति प्रकारीभूत धर्मनिष्ठ प्रतियोगिता निरूपकाभावः इदं पदार्थे वर्तते इति इदं पदार्थः अधिकरणं।

आधेयता प्रकारीभूत धर्मनिष्ठ प्रतियोगिता निरूपकाभावनिष्ठा। अधिकरणता इदं पदार्थनिष्ठा। इदं पदार्थ निष्ठ अधिकरणतायाः प्रकारीभूतधर्म निष्ठ प्रतियोगिता निरूपकाभाव निष्ठाधेयतायाश्च निरूपितत्वं संबन्धः।

एवं च प्रकारीभूतधर्मनिष्ठप्रतियोगिता निरूपकाभावनिष्ठाधेयता निरूपिताधिकरणता वान् इदं पदार्थः। सः एव अस्मिन् ज्ञाने विशेष्यः। विशेष्यता अधिकरणता वन्निष्ठा। विशेष्यतया निरूपकं इदं रजतं इत्याकारक ज्ञानं। निरूपकत्वं इदं रजतं इत्याकारक ज्ञाने

वर्तते इति प्रथम दलं ।

अथ पूर्वोक्त धर्मः (रजतत्वं) अस्मिन् ज्ञाने प्रकारः । प्रकारिता पूर्वोक्तधर्मनिष्ठ प्रकारतया निरूपकं इदं रजतं इत्याकारक ज्ञानं इति द्वितीयदलं ।

अस्मिन् ज्ञाने ज्ञानत्वं अपि वर्तते इति तृतीय दलं ।

यथार्थानुभवश्च चतुर्विधः — प्रत्यक्षानुमित्युपमितिशाब्दभेदात् ।

1) प्रत्यक्षः — अयं घटः
2) अनुमिति: — पर्वतः वह्निमान् । पक्षः साध्यवान्
3) उपमिति: — अयं अनेन पदेन वाच्यः इत्याकारक ज्ञानं ।
4) शाब्दबोधः — अहं गच्छामि इति वाक्यजन्य ज्ञानं । गमनानुकूलकृतिमान् अहं ।

शाब्दबोध्य अर्थ संसर्ग ज्ञानं शाब्दबोधः ।

ಶಬ್ದದಿಂದ ಬೋಧ್ಯವಾದ ಅರ್ಥಗಳಿಗೆ ಇರುವ
ಸಂಬಂಧದ ಜ್ಞಾನವೇ ಶಾಬ್ದಬೋಧವು.

ಉತ್ಪತ್ತಿ

ಪ್ರತ್ಯಕ್ಷಕ್ಕೆ ಕರಣದಿಂದ ಪ್ರತ್ಯಕ್ಷದ ಜ್ಞಾನ
ಅನುಮಾನಕ್ಕೆ ಕರಣದಿಂದ ಅನುಮಿತಿಯ ಜ್ಞಾನ ಉತ್ಪತ್ತಿ
ಉಪಮಾನಕ್ಕೆ -do- ಉಪಮಿತಿಯ -do-
ಶಬ್ದಕ್ಕೆ ಕರಣದಿಂದ ಶಾಬ್ದಬೋಧಕ್ಕೆ

(शब्दस्य अयं शाब्दः | प्रत्यक्षं च
अनुमितिश्च उपमितिश्च शाब्दश्च
प्रत्यक्षानुमित्युपमितिशाब्दाः | शाब्दानां
भेदः शाब्दभेदः - तस्मात् |

परामर्श

साध्यव्याप्यहेतुमान् अयं पक्षः इति

साध्येन व्याप्यः = साध्यव्याप्यः
साध्यव्याप्यश्चासौ हेतुश्च
साध्यव्याप्यहेतुः |
साध्यव्याप्यहेतुः अस्मिन् अस्तीति
साध्यव्याप्यहेतुमान् |

1) ಕರಣ ಪ್ರತ್ಯಕ್ಷ ಇಂದ್ರಿಯ	ಕಾರಣ, ಅವಾಂತರ ವ್ಯಾಪಾರ. ಇಂದ್ರಿಯಾರ್ಥ ಸನ್ನಿಕರ್ಷ	ಫಲ, ಪ್ರತ್ಯಕ್ಷಾತ್ಮಕ ಜ್ಞಾನ.
2) अनुमान हेतुः साध्यव्याप्यः इत्याकारक ज्ञानं	परामर्शः साध्यव्याप्य हेतुमान् अयं पक्षः इत्याकारक ज्ञानं	अनुमितिः पक्षः साध्यवान्
3) उपमानं सादृश्य ज्ञानं उपमान गो सदृशः	अतिदिष्ट ~~[illegible]~~ वाक्यार्थ स्मरणं ಉಪಮಾನಕ್ಕೆ ಹೇಳಿದ ವಾಕ್ಯಾರ್ಥದ ಸ್ಮರಣ	संज्ञासंज्ञि संबन्ध ज्ञानं उपमितिः
4) शब्द	वाच्यवाचक संबन्ध ज्ञानं	शाब्दबोधः

इदं पुस्तकं इत्याकारक ज्ञानं फलप्रत्यक्षं
पदार्थ विशिष्ट इन्द्रिय - करण प्रत्यक्ष
ಪ್ರತ್ಯಕ್ಷ. ಅಂದರೆ ಪದಾರ್ಥ ಸಂಬಂಧ ಇಂದ್ರಿಯ.

104

करण

तत्करणमपि चतुर्विधं -
प्रत्यक्षानुमानोपमानशब्दभेदात् ।

—— ० ——

करणस्य लक्षणं

असाधारणं कारणं करणम्
व्यापारवत्तासम्बन्धेन यत् कारणं तत्
करणं ।
लक्षणं तु — व्यापारद्वारा कार्यजनकत्वं
करणस्य लक्षणं ।
यथा दारुद्वैधीभावं प्रति कुठारः ।

कुठारः ऊर्ध्वाधोदेश संयोगरूप
व्यापारद्वार एव दारुच्छेदनं करोति ।
अतः दारुद्वैधीभावः फलं । ऊर्ध्वाधोदेश
संयोगः व्यापारः । कुठारः करणं ।
एवं प्रत्यक्षादिषु ज्ञातव्यं ।

60 (1200) (920) 105

1992	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa
JUL	—	—	—	1	2	3	4	5	6	7	8	9	10	11	12	13	14	15	16	17	18
	19	20	21	22	23	24	25	26	27	28	29	30	31	—	—	—	—	—	—	—	—

JUNE 9
Tuesday

कारणस्य लक्षणं

कार्य नियत पूर्व वृत्ति कारणम् ।
पूर्वं वृत्तिः यस्य तत् पूर्ववृत्ति ।

नियतश्च तत् पूर्ववृत्ति च नियतपूर्ववृत्ति
कार्यस्य नियतपूर्ववृत्ति कार्यनियतपूर्ववृत्ति

लक्षणं तु – कार्यनियतत्वे सति कार्यपूर्व-
वृत्तित्वं कारणस्य लक्षणं ।

समन्वयस्तु – दण्डः घटसृष्टिं प्रति नियतः
तथा घटसृष्टिक्षणात् अव्यवहित पूर्वक्षणे
दण्डः वर्तते इति कार्यनियतत्वं कार्य-
पूर्व वृत्तित्वं च दण्डे वर्तते इति दण्डे
लक्षण समन्वयः ।

106 10-10-98

कार्यस्य लक्षणं

कार्यं प्रागभाव प्रतियोगि

प्रागभावप्रतियोगित्वं कार्यस्य लक्षणं।

घटे समन्वयः। घटसृष्टेः प्राक् सृज्यमानः यः घटाभावः वर्तते सः घटप्रागभावः, घटसृष्टेः नन्तर नश्यति। तादृश घटप्रागभावस्य प्रतियोगि घटः इति प्रागभावप्रतियोगित्व घटे वर्तते इति लक्षण समन्वयः।

कारणं

1992	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa
JUL	—	—	—	1	2	3	4	5	6	7	8	9	10	11	12	13	14	15	16	17	18
	19	20	21	22	23	24	25	26	27	28	29	30	31	—	—	—	—	—	—	—	—

कारणं त्रिविधं - समवाय्यसमवायिनिमित्तभेदात्

समवायिकारणस्य लक्षणं

यत्समवेतं कार्यमुत्पद्यते तत् समवायि-कारणम् । यथा तन्तवः पटस्य । पटश्च स्वगत रूपादेः ।

लक्षणं तु - समवायसम्बन्धावच्छिन्न कार्यता निरूपित तादात्म्य सम्बन्धावच्छिन्न कारणतावत्वं समवायि-कारणस्य लक्षणं ।

कार्यं पटः, स च तन्तौ समवायसम्बन्धेन वर्तते । कारणं तन्तुः पटः तन्तौ समवायसम्बन्धेन विद्यमानः सन् कार्यः । तन्तु स्वस्मिन् एव तादात्म्यसम्बन्धेन विद्यमानः सन् पटं प्रति कारणं ।

कारणता तन्तुनिष्ठा तादात्म्य-सम्बन्धावच्छिन्ना । कार्यता पटनिष्ठा

समवायसम्बन्धावच्छिन्न । एवं च पटनिष्ठ समवायसम्बन्धावच्छिन्न कार्यतायाः, तन्तुनिष्ठ तादात्म्यसम्बन्धावच्छिन्न कारणतायाश्च निरूपितत्वं सम्बन्धः ।

एवं च समवायसम्बन्धावच्छिन्न कार्यता निरूपित तादात्म्यसम्बन्धावच्छिन्न कारणतावान् तन्तुः । कारणतावत्वं तन्तौ वर्तते इति लक्षण समन्वयः ।

ಪ್ರತ್ಯಕ್ಷವಾಗಿ ಕಾರಣವಾಗಿದ್ದರೆ ಸಮವಾಯಿ ಕಾರಣ ಯಥಾ:- घटं प्रति कपालद्वयम् । ಇಲ್ಲಿ ಕಪಾಲದ್ವಯವು ಸಮವಾಯಿಕಾರಣ. ಹೇಗೆಂದರೆ ಕಪಾಲದ್ವಯವು ಘಟಕ್ಕೆ ಪ್ರತ್ಯಕ್ಷವಾಗಿದೆ ಮತ್ತು ಕಾರಣವಾಗಿದೆ. ಪಟವನ್ನು ಕಾರ್ಯ. ತಂತುಗಳಲ್ಲಿ ಪಟವಾಗಿ ಪರಿಣಾಮ ಹೊಂದಿದೆ. ಇಲ್ಲಿ ಪಟವು ಕಾರ್ಯ, ತಂತುಗಳು ಕಾರಣ. ತಂತುಗಳಲ್ಲಿ ಪಟಕ್ಕೆ ಪ್ರತ್ಯಕ್ಷವಾಗಿದೆ.

11-10-98. 109

1992 Su Mo Tu We Th Fr Sa Su Mo Tu We Th Fr Sa Su Mo Tu We Th Fr Sa
JUL — — — 1 2 3 4 5 6 7 8 9 10 11 12 13 14 15 16 17 18
19 20 21 22 23 24 25 26 27 28 29 30 31

JUNE 13 Saturday

असमवायिकारणस्य लक्षणं :
कार्येण कारणेन वा सहैकस्मिन्नर्थे
समवेतं सत् कारणमसमवायिकारणम्
यथा - तन्तुसंयोगः पटस्य, तन्तुरूपं
पटरूपस्य ।

लक्षणं — समवायसंबन्धावच्छिन्न कार्यता
निरूपित समवाय स्वसमवायि समवेतत्वं ।
एतदन्यतर सम्बन्धावच्छिन्न कारणतावत्वं
असमवायिकारणस्य लक्षणं ।

समन्वयस्तु — पटं प्रति तन्तुसंयोगः
असमवायि कारणं । तथा पटरूपं
प्रति तन्तुगतरूपं असमवायि कारणं ।
तत्र समन्वयः — पटः तन्तौ समवाय-
सम्बन्धेन विद्यमानः सन् कार्यः ।
तन्तु संयोगः तन्तौ समवायसम्बन्धेन
विद्यमानः सन् पटं प्रति कारणं ।

JUNE 14 Sunday

कार्यता पटनिष्ठा समवाय सम्बन्धावच्छिन्न,
कारणता तन्तुसंयोगनिष्ठ समवायसम्बन्धा
वच्छिन्न । एवं च समवायसम्बन्धा
वच्छिन्न

110

15 JUNE
Monday

1992 MAY

संयोगनिष्ठ कारणतायाः समवाय-
सम्बन्धावच्छिन्न पटनिष्ठ कार्यतायाश्च
निरूपितत्वं सम्बन्धः।

एवं च समवायसम्बन्धावच्छिन्न पटनिष्ठ
कार्यता निरूपित समवायसम्बन्धावच्छिन्न
कारणतावान् तन्तु सम्योगः।
कारणतावत्वं तन्तु सम्योगे वर्तते
इति लक्षण समन्वयः।

अथ तन्तु रूपे समन्वयः।

पटरूपं पटे समवायसम्बन्धेन
विद्यमानं सत् कार्यं। तन्तु रूपं
अपि पटे स्वसमवायि समवेतत्व
सम्बन्धेन पटे विद्यमानं सत् पटरूपं
प्रति कारणं।
तथाहि स्वं तन्तुरूपं। स्वसमवायि
कारणं तन्तुः। तस्मिन् तन्तौ पटः
समवाय सम्बन्धेन वर्तते इति स्वसमवायि
समवेतः पटः। स्वसमवायि समवेतत्वं
पटे वर्तते इति स्वसमवायि

॥

1992	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa
JUL	—	—	—	1	2	3	4	5	6	7	8	9	10	11	12	13	14	15	16	17	18
	19	20	21	22	23	24	25	26	27	28	29	30	31	—	—	—	—	—	—	—	—

JUNE 16
Tuesday

समवेतत्व सम्बन्धेन तन्तु रूपे पटे आयाते। एवं च कारणता तन्तु-रूपनिष्ठा स्वसमवायि समवेतत्व सम्बन्धावच्छिन्ना, कार्यता पटरूपनिष्ठा समवाय सम्बन्धावच्छिन्ना।


तन्तु रूप निष्ठ स्वसमवायि समवेतत्व सम्बन्धावच्छिन्न कारणतायाः पटरूप-निष्ठा समवाय सम्बन्धावच्छिन्न' कार्यतायाः निरूपितत्वं सम्बन्धः।

? एवं च

ಪಟವು ಸೃಷ್ಟಿಯಾಗಬೇಕಾದರೆ ತಂತುಗಳು ಬೇಕು. ಅಂದರೆ ತಂತುಗಳ ವಿಲಕ್ಷಣವಾದ ಪರಸ್ಪರ ಸಂಯೋಗದಿಂದ ಪಟವಾಗಿ ಪರಿಣಾಮ ಹೊಂದುತ್ತದೆ. ತಂತುಗಳು ಪಟಕ್ಕೆ ಅವಯವಗಳು. ಪಟವು ಅವಯವಿ. "ಅವಯವ ಅವಯವಿನೋಃ ಸಮವಾಯಃ" ಎಂಬ ನಿಯಮಾನುಸಾರ ಪಟ ಮತ್ತು ಪಟದ ಅವಯವಗಳಾದ ತಂತುಗಳಿಗೂ ಸಮವಾಯ ಸಂಬಂಧವು. ಹೀಗೆ ಪಟವನ್ನು ಕುರಿತು ತಂತುಗಳು ಸಮವಾಯಿ ಕಾರಣವಾಗಿದೆ. ಅದರಂತೆ ತಂತುಗಳಿಗೆ ಹತ್ತಿಯು ಸಮವಾಯಿ ಕಾರಣವಾಗಿದೆ. ಅದರಂತೆಯೇ ಘಟವನ್ನು ಕುರಿತು ಎರಡು ಕಪಾಲಗಳು ಸಮವಾಯಿ ಕಾರಣ.

ಕಪಾಲಗಳ ಸಂಯೋಗವು ಘಟವನ್ನು ಕುರಿತು ಅಸಮವಾಯಿಕಾರಣ. ಈ ಕಪಾಲಕ್ಕೆ ಮಣ್ಣು ಸಮವಾಯಿ ಕಾರಣವಾಗಿದೆ. ಪಟದ ರೂಪವನ್ನು ಕುರಿತು ತಂತುಗಳ ರೂಪವು ಅಸಮವಾಯಿ ಕಾರಣವಾಗಿದೆ. ಈ ಪಟವನ್ನು ಕುರಿತು

ಕುವಿಂದ (ನೇಕಾರ), ತುರೀ ವೇಮ, ಈಶ್ವರ ಅದೃಷ್ಟ, ಕಾಲ ಇವೆಲ್ಲವೂ ನಿಮಿತ್ತ ಕಾರಣ. ಅದರಂತೆ ಘಟವನ್ನು ಕುರಿತು ಚಕ್ರ, ದಂಡ, ಕುಲಾಲ, ಈಶ್ವರ ಕಾಲ ಇತ್ಯಾದಿ ನಿಮಿತ್ತ ಕಾರಣಗಳು.



ಕಾರ್ಯವಾದ ಘಟವು ಪರಸ್ಪರ ಸಂಯುಕ್ತವಾದ ಎರಡು ಕಪಾಲಗಳಲ್ಲಿ ಇರುತ್ತದೆ. ಇವೇ ಕಪಾಲದ್ವಯಗಳ ಸಂಯೋಗವು ಇದ್ದು ಘಟವನ್ನು ಕುರಿತು ಕಾರಣವಾಗಿದೆ.

1) ಅವಯವವು ಅವಯವಿಯನ್ನು ಕುರಿತು ಸಮವಾಯಿ ಕಾರಣ.
2) ಅವಯವ ಸಂಯೋಗವು ಅವಯವಿಯನ್ನು ಕುರಿತು ಅಸಮವಾಯಿ ಕಾರಣ.
3) ಅವಯವಿಯು ಅವಯವಿಯ ಗುಣಗಳನ್ನು ಕುರಿತು ಸಮವಾಯಿ ಕಾರಣ.
4) ಅವಯವದ ಗುಣಗಳು ಅವಯವಿ ಗುಣಗಳನ್ನು ಕುರಿತು ಅಸಮವಾಯಿ ಕಾರಣ.

114

19 JUNE Friday

1992	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa
MAY	—	—	—	—	—	1	2	3	4	5	6	7	8	9	10	11	12	13	14	15	16
	17	18	19	20	21	22	23	24	25	26	27	28	29	30	31	—	—	—	—	—	—

5) [illegible]
[illegible]

6) [illegible]
[illegible]

7) [illegible]
[illegible]

निमित्तकारणस्य लक्षणं

तदुभयभिन्नं कारणं निमित्तकारणम्
यथा - तुरीवेमादिकं पटस्य

तदुभयभिन्नं = ಸಮವಾಯಿ ಅಸಮವಾಯಿ
ಕಾರಣಗಳ ಬೇರೆಯಾದ ಭಿನ್ನವಾದಂತಹ
ಕಾರಣವು ನಿಮಿತ್ತ ಕಾರಣವು.

समवाय्यसमवायिभिन्नं कारणं
निमित्तकारणमित्यर्थः।

समवायिकारणभिन्नत्वे सति
असमवायिकारणभिन्नत्वे सति कारणत्वं
निमित्तकारणस्य लक्षणं।

पटं प्रति तुरीवेमादिकं कारणं। किं तु
तत् न समवायिकारणं नापि
असमवायिकारणं। एवं च समवायिकारण
भिन्नत्वं असमवायिकारणभिन्नत्वं च
तुरीवेमादिके वर्तते। अतः तुरीवेमादिकं
निमित्तकारणं इति भण्यते।

तदेतत्त्रिविधकारणमध्ये यदसाधारणं कारणं तदेव करणम्।

प्रत्यक्षप्रमाणलक्षणं (करण प्रत्यक्ष)

तत्र प्रत्यक्षज्ञानकरणं प्रत्यक्षम्।

प्रत्यक्षं च तत् ज्ञानं च प्रत्यक्षज्ञानस्य करण – प्रत्यक्षज्ञानकरणं।

[illegible]

प्रत्यक्षात्मकज्ञाननिष्ठ कार्यता निरूपित व्यापारसम्बन्धावच्छिन्न कारणतावत्त्वं करण प्रत्यक्षस्य लक्षणं।

चक्षुरिन्द्रियं इन्द्रियार्थसन्निकर्ष द्वारेण रूपप्रत्यक्षं जनयति। एवं च रूपज्ञानं कार्यं। चक्षुरिन्द्रियं कारणं। कार्यता रूपज्ञाननिष्ठा। कारणता चक्षुरिन्द्रियनिष्ठा। रूपज्ञाननिष्ठ कार्यतायाः

1992 Su Mo Tu We Th Fr Sa Su Mo Tu We Th Fr Sa Su Mo Tu We Th Fr Sa
JUL — — — 1 2 3 4 5 6 7 8 9 10 11 12 13 14 15 16 17 18
19 20 21 22 23 24 25 26 27 28 29 30 31 — — — — — — — —

JUNE 23 Tuesday

चक्षुरिन्द्रियनिष्ठ कारणतायाश्च
निरूपितत्वं सम्बन्धः। रूपज्ञानीयनिष्ठ
कार्यतानिरूपित व्यापारसम्बन्धावच्छिन्न
कारणतावत् करणप्रत्यक्षं ।
कारणतावत्वं करणप्रत्यक्षो वर्तते इति।

ಇಂದ್ರಿಯಕ್ಕೂ ಕರಣ ಪ್ರತ್ಯಕ್ಷಕ್ಕೂ ಏನು ಸಂಬಂಧ.
ಇಂದ್ರಿಯ ರೂಪ ಜ್ಞಾನಕ್ಕೆ ಕಾರಣ ಪ್ರತ್ಯಕ್ಷ

ಪ್ರತ್ಯಕ್ಷ ಜ್ಞಾನ ಎಂದರೆ ಇಂದ್ರಿಯದಿಂದ
ಹುಟ್ಟುವ ಜ್ಞಾನ.

118 फल प्रत्यक्षस्य लक्षणं

24 JUNE Wednesday

1992	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa
MAY	–	–	–	–	–	1	2	3	4	5	6	7	8	9	10	11	12	13	14	15	16
	17	18	19	20	21	22	23	24	25	26	27	28	29	30	31						

(फलप्रत्यक्षम्)

इन्द्रियार्थ सन्निकर्षजन्य ज्ञानं प्रत्यक्षम्

(ज्ञानाकरणकं ज्ञानं प्रत्यक्षम्)
तद्द्विविधम् निर्विकल्पकं सविकल्पकं चेति।

इन्द्रियश्च अर्थश्च इन्द्रियार्थौ।
इन्द्रियार्थयोः सन्निकर्षः। सन्निकर्षेण
जन्यं।
लक्षण! — इन्द्रियनिष्ठ प्रतियोगितानिरूपक
अर्थनिष्ठ अनुयोगिता निरूपक सम्बन्ध
निष्ठ जनकता निरूपित जन्यतावत्वे
सति ज्ञानत्वं प्रत्यक्षात्मक ज्ञानस्य लक्षणं

लक्षण समन्वयः। — चक्षुरिन्द्रियं अर्थः
(घट) तद्द्वयोः सन्निकर्षेण रूपज्ञानं
जायते। अस्य सन्निकर्षस्य चक्षुरिन्द्रिय
प्रतियोगि। अर्थः अनुयोगि।
प्रतियोगिता चक्षुरिन्द्रिय निष्ठा।
अनुयोगिता अर्थनिष्ठा।

चक्षुरिन्द्रियनिष्ठ प्रतियोगितायाः,
अर्थनिष्ठ अनुयोगितायाश्च निरूपकः
अयं सम्बन्धः। अयं सम्बन्धः

जनकः। अर्थज्ञानं जन्यं।
जनकता सम्बन्धनिष्ठा। जन्यता अर्थज्ञाननिष्ठा। सम्बन्धनिष्ठ जनकतायाः, अर्थज्ञाननिष्ठ जन्यतायाः च निरूपितत्वं सम्बन्धः।

एवं च इन्द्रियनिष्ठ प्रतियोगिता निरूपक अर्थनिष्ठ अनुयोगिता निरूपक सम्बन्धनिष्ठ जनकता निरूपित जन्यतावत् - प्रत्यक्षात्मकं ज्ञानं। जन्यतावत्वं प्रत्यक्षात्मक ज्ञाने वर्तते इति लक्षण समन्वयः।

अस्मिन् ज्ञाने ज्ञानत्वं अपि वर्तते

1) ಇಂದ್ರಿಯದ ಸಹಾಯದಿಂದ ಅರ್ಥಜ್ಞಾನವು ಹುಟ್ಟುತ್ತದೆ.

2) ಸಂಬಂಧ ಎಂದರೆ ಇಂದ್ರಿಯಕ್ಕೂ ಅರ್ಥಕ್ಕೂ ಇರುವ ಸಂಬಂಧ.

120

26 JUNE Friday

1992	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa
MAY	–	–	–	–	–	1	2	3	4	5	6	7	8	9	10	11	12	13	14	15	16
	17	18	19	20	21	22	23	24	25	26	27	28	29	30	31	–	–	–	–	–	–

तत्र निष्प्रकारकं ज्ञानं निर्विकल्पकम्
यथा किञ्चिदिदमिति ।

सप्रकारकं ज्ञानं सविकल्पकं । यथा
ब्राह्मणोऽयं, श्यामोऽयमिति, डित्थोऽयं ।

सन्निकर्षः

प्रत्यक्षज्ञानहेतुरिन्द्रियार्थसन्निकर्षः
षड्विधः — १) संयोगः २) संयुक्तसमवायः
३) संयुक्तसमवेतसमवायः, ४) समवायः
५) समवेतसमवायः ६) विशेषणविशेष्यभावश्चेति

1) चक्षुषा घटप्रत्यक्षजनने संयोगः सन्निकर्षः।
~~चक्षुषा~~ चक्षुरिन्द्रियेण घटप्रत्यक्षं
(घटज्ञानं) जायते। तत्र घटचक्षुषोः
संयोगः सन्निकर्षः। घटस्य पार्थिव
द्रव्यत्वात्, चक्षुषः तेजोद्रव्यत्वात्।

2) घटरूपप्रत्यक्षजनने संयुक्तसमवायः
सन्निकर्षः चक्षुःसंयुक्ते घटे
रूपस्य समवायात्।

12-10-98 शुक्रवार (21)

1992	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa
JUL	—	—	—	1	2	3	4	5	6	7	8	9	10	11	12	13	14	15	16	17	18
	19	20	21	22	23	24	25	26	27	28	29	30	31	—	—	—	—	—	—	—	—

JUNE 27 Saturday

चक्षुरिन्द्रियेण घटनिष्ठरूपज्ञानं जायते
तदा चक्षुरिन्द्रिय घटगतरूपयोः -सम्युक्त
समवाय सन्निकर्षः। चक्षुसम्युक्तः घटः
तत्र समवाय सम्बन्धेन रूपं वर्तते इति
सम्युक्तसमवायः रूपे वर्तते।

3) रूपत्व सामान्यप्रत्यक्षे सम्युक्तसमवेत-
समवायः सन्निकर्षः, चक्षुःसम्युक्ते घटे
रूपं समवेतं तत्र रूपत्वस्य समवायात्।

अथ तादृश चक्षुःसम्युक्तघटनिष्ठ
रूपनिष्ठ रूपत्वरूप जातिप्रत्यक्षं
अपि जायते। तत्र चक्षुरिन्द्रिय

JUNE 28 Sunday

रूपत्वयोः सम्युक्त समवेत समवाय सन्निकर्षः।

चक्षुःसम्युक्तः घटः। तत्र घटे समवाय-
सम्बन्धेन विद्यमानं (समवेतं) रूपं। तत्र
रूपे समवायसम्बन्धेन वर्तते रूपत्वं इति
चक्षुःसम्युक्तसमवेत समवायः रूपत्वे
आयातं। एवं च चाक्षुषा रूपत्व
ज्ञाने सम्युक्तसमवेत समवाय सन्निकर्षः।

29 JUNE Monday

1992	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa
MAY	—	—	—	—	—	1	2	3	4	5	6	7	8	9	10	11	12	13	14	15	16
	17	18	19	20	21	22	23	24	25	26	27	28	29	30	31	—	—	—	—	—	—

1) पार्थिव द्रव्य - घ्राणेन्द्रिय
2) जल द्रव्य - रसनेन्द्रिय
3) तेजो द्रव्य - चक्षुरिन्द्रिय
4) वायु द्रव्य - त्वगिन्द्रिय
5) आकाश द्रव्य - श्रोत्रेन्द्रिय।
(श्रोतृ - ऋकारान्तः पुल्लिङ्गः।)

(शब्द प्रत्यक्षः)

श्रोत्रेण शब्दसाक्षात्कारे समवायः सन्निकर्षः, कर्णविवरवर्त्याकाशस्य श्रोत्रत्वाच्छब्दस्याकाशगुणत्वाद् गुणगुणिनोः च समवायात्॥

1) शब्दत्वसाक्षात्कारे समवेतसमवायः सन्निकर्षः श्रोतसमवेते शब्दे शब्दत्वस्य समवायात्।

2) श्रोत्रेन्द्रियेण शब्दज्ञानं जायते। तत्र शब्द श्रोतयोः आकाशद्रव्यत्वात् समवाय-सन्निकर्षः। शब्दस्य गुणत्वात्, श्रोतुः द्रव्यत्वात्।

श्रोत्रेन्द्रियेण शब्दनिष्ठ शब्दत्व प्रत्यक्षं जायते। तदा श्रोत्रेन्द्रिय (शब्दनिष्ठ) शब्दत्वयोः समवेत समवायः। श्रोत समवेतः शब्दः। शब्दे समवाय सम्बन्धेन शब्दत्वं वर्तते इति समवेत समवायः।

अभावप्रत्यक्षे विशेषणविशेष्याभावः सान्निकर्षः घटाभाववद्भूतलमित्यत्र चक्षुःसंयुक्ते भूतले घटाभावस्य विशेषणत्वात्।

अभावप्रत्यक्षे विशेषणविशेष्याभावः सन्निकर्ष। भूतल घटाभाववत् इति भूतलविशेष्यक घटाभावप्रकारक ज्ञानं जायते।

अतः चक्षुस्सम्युक्तं भूतलं। चक्षुषः तेजो द्रव्यत्वात्, भूतलस्य पार्थिवद्रव्यत्वात्

भूतले घटाभावः इति विशेषणः। विशेषणता अभावनिष्ठा। एवं च चक्षुषा घटाभाव ज्ञानकाले विशेषण विशेष्याभाव सान्निकर्षः।

1 JULY
Wednesday

1992	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa
JUN	—	1	2	3	4	5	6	7	8	9	10	11	12	13	14	15	16	17	18	19	20
	21	22	23	24	25	26	27	28	29	30	—	—	—	—	—	—	—	—	—	—	—

विशेषणविशेष्यभाव सन्निकर्षः नाम
विशेषणता विशेष्यता इत्यर्थः॥

[illegible]
[illegible]

228

6 JULY Monday

1992	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa
JUN	—	1	2	3	4	5	6	7	8	9	10	11	12	13	14	15	16	17	18	19	20
	21	22	23	24	25	26	27	28	29	30	—	—	—	—	—	—	—	—	—	—	—

अनुमिति = अनुमितिः ①
अनुमिते: षष्ठ्या: = कार्यता ②
करणम् : व्यापारसम्बन्धावच्छिन्न कारणतावत्
करणम् इत्यत्र प्रथमाया: अभेद:

अथ
अनुमान
खण्डम्

वत्:
अनुमिति + 6 + करण एकदेश + कारणता
+ प्रथमार्थ अभेद + अनुमानं
कारणम्.

English — ... — ... — ...

Rail.

12-10-98. (ಅನುಮಾನಲಕ್ಷಣ) 129

अनुमानस्य लक्षणं

अनुमितिकरणमनुमानम् ।

अनुमितेः करणम् - अनुमितिकरणम्

1) अत्र करणशब्दस्य व्यापारसम्बन्धावच्छिन्न कारणतावत् इत्यर्थः । अनुमिति शब्दस्य अनुमितिः इत्यर्थः । करणम् इत्यत्र प्रथमायाः अभेदः इत्यर्थः । अनुमितेः इत्यत्र षष्ठ्याः कार्यता इत्यर्थः ।

2) अनुमितेः - आधेयता सम्बन्धेन षष्ठ्यर्थः कार्यतायां अन्वयः । कार्यतायाः निरूपितत्व सम्बन्धेन करण शब्दार्थैक देश कारणतायाम् अन्वयः । कारणतावतः स्वनिष्ठप्रतियोगिता निरूपकत्व सम्बन्धेन प्रथमार्थे अभेदे अन्वयः अभेदस्य आश्रयता सम्बन्धेन अनुमाने अन्वयः ।

एवं च अनुमितिनिष्ठकार्यता निरूपित

1992	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa
JUN	—	1	2	3	4	5	6	7	8	9	10	11	12	13	14	15	16	17	18	19	20
	21	22	23	24	25	26	27	28	29	30	—	—	—	—	—	—	—	—	—	—	—

व्यापारसम्बन्धावच्छिन्न कारणतावन्निष्ठ
प्रतियोगिता निरूपक अभेदाश्रयः धूमः
(अभेदवत्) अनुमानं इति शाब्दबोधः

लक्षणं तु — अनुमितिनिष्ठ कार्यता-
निरूपित व्यापारसम्बन्धावच्छिन्न
कारणतावत्वं अनुमानस्य लक्षणं।

प्रकृते — पर्वतः वह्निमान् धूमात्
इत्यत्र धूमः वह्निव्याप्यः इत्याकारक
ज्ञाने समन्वयः

पुरुषः प्रथमं पर्वते धूमं पश्यति।
तस्य (पुरुषस्य) पर्वतः धूमवान् इत्याकारक
ज्ञानं जायते। तदनन्तरं यत्र धूमः
तत्र वह्निः इति व्याप्तेः स्मरणं
पुरुषस्य जायते। कुतः इति
चेत् यत्र यत्र धूमं पश्यति
तत्र तत्र वह्निमपि दृष्टवान् इति
धूमस्य वह्निनिरूपित व्याप्तिः तस्य
ज्ञाता एव वर्तते।
एवं च एकसम्बन्धिज्ञानं

अपरसम्बन्धि स्मारकं इति नियमानुसारेण प्रकृते धूमज्ञानसद्भावात् धूमसम्बन्धि व्याप्तिस्मरणमपि भवति।

एवं च धूमः वन्हिव्याप्यः इत्याकारक व्याप्तिज्ञानानन्तरं वन्हिव्याप्य धूमवान् अयं पर्वतः इत्याकारक परामर्षः जायते।

परामर्षानन्तरं पर्वतः वन्हिमान् इत्याकारक अनुमितिः जायते। एवं च धूमः वन्हिव्याप्यः इत्याकारक व्याप्ति-ज्ञानं, वन्हिव्याप्य धूमवान् अयं पर्वतः इत्याकारक परामर्ष द्वारा, पर्वतः वन्हिमान् इत्याकारक अनुमितिं जनयति।
एवं च अनुमितिः कार्या। अनुमानं परामर्ष द्वारा कारणं। कारणता अनुमान निष्ठा व्यापारसम्बन्धावच्छिन्न कार्यता अनुमिति निष्ठा।
अनुमितिनिष्ठ कार्यतायाः अनुमाननिष्ठ कारणतायाश्च निरूपितत्वं सम्बन्धः।

एवं च अनुमितिनिष्ठ कार्यतानिरूपित व्यापारसम्बन्धावच्छिन्न कारणतावत् अनुमानं। कारणतावत्वं अनुमाने वर्तते इति लक्षण समन्वयः।

अनुमितिः

परामर्शजन्यं ज्ञानमनुमितिः।
परामर्श त जन्यं॥
परामर्शशब्दस्य परामर्शः इत्यर्थः। (नाम व्याप्ति विशिष्ट पक्षधर्मता ज्ञानं) तत्र पञ्चम्याः जनकता इत्यर्थः। जन्य शब्दस्य जन्यतावत् इत्यर्थः। जन्यं इत्यत्र प्रथमायाः अभेदः इत्यर्थः।

परामर्शस्य आधेयता सम्बन्धेन पञ्चम्यर्थ जनकतायां अन्वयः जनकतायाः निरूपितत्व सम्बन्धेन जन्यशब्दार्थैकदेश जन्यतायां अन्वयः जन्यतावतः स्वनिष्ठप्रतियोगिता निरूपकत्व सम्बन्धेन प्रथमार्थ

13-10-98 133

1992	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa
AUG	—	—	—	—	—	—	1	2	3	4	5	6	7	8	9	10	11	12	13	14	15
	16	17	18	19	20	21	22	23	24	25	26	27	28	29	30	31	—	—	—	—	—

JULY 11 Saturday

अभेदे अन्वयः। अभेदस्य आश्रयता सम्बन्धेन ज्ञाने अन्वयः। ज्ञाने इत्यत्र प्रथमायाः अभेदः इत्यर्थः। ज्ञानस्य स्वनिष्ठ प्रतियोगिता निरूपकत्व सम्बन्धेन प्रथमार्थ अभेदे अन्वयः।

अभेदस्य आश्रयता सम्बन्धेन अनुमितौ अन्वयः। एवं च अनुमितिः — परामर्शनिष्ठ जनकतानिरूपित जन्यता — वन्निष्ठ प्रतियोगितानिरूपक अभेदाश्रय ज्ञाननिष्ठ प्रतियोगिता निरूपक अभेदवती इति शाब्दबोधः।

JULY 12 Sunday

संक्षेपणं तु — परामर्शनिष्ठ जनकता-निरूपित जन्यतावद् ज्ञानाभिन्ना अनुमितिः इति।

परामर्श जन्य ज्ञानाभिन्ना अनुमितिः।

लक्षणं तु — परामर्शनिष्ठ जनकतानिरूपित जन्यतावत्वे सति ज्ञानत्वं अनुमितेः लक्षणं।

१३४

13 JULY
Monday

1992	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa
JUN	—	1	2	3	4	5	6	7	8	9	10	11	12	13	14	15	16	17	18	19	20
	21	22	23	24	25	26	27	28	29	30	—	—	—	—	—	—	—	—	—	—	—

प्रकृते पर्वतः वन्हिमान् धूमात् इत्यत्र पर्वतः वन्हिमान् इत्याकारक अनुमितौ समन्वयः।

पूर्वोक्तरीत्या परामर्षात् अनुमितिः जायते। एवं च अनुमितिः जन्या परामर्शः जनकः। जन्यता अनुमिति-निष्ठ। जनकता परामर्षनिष्ठ। अनुमिति निष्ठ जन्यतायाः, परामर्ष निष्ठ जनकतायाश्च निरूपितत्व सम्बन्धः।
एवं च परामर्षनिष्ठ जनकतानिरूपित जन्यतावती अनुमितिः। जन्यतावत्वं अनुमितौ वर्तते इति लक्षण समन्वयः। ज्ञानत्वं रूप द्वितीयदलं अपि अनुमितौ वर्तते इति लक्षण समन्वयः।

॥ परामर्शस्य लक्षणं ॥ 135

व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः । यथा "वह्निव्याप्य धूमवानयं पर्वतः" इति ज्ञानं परामर्शः । तज्जन्यं पर्वतो वह्निमानिति ज्ञानमनुमितिः ।

व्याप्तिविशिष्टपक्षधर्मता ज्ञानं परामर्शः वह्निव्याप्य धूमवान् अयं पर्वतः इत्याकारक ज्ञाने समन्वयः ।
लक्षणं तु - व्याप्तिविशिष्ट प्रकारता निरूपकत्वे सति पक्षधर्मता विषयकत्वे सति ज्ञानत्वं

साध्यनिष्ठ प्रकारता निरूपिता या व्याप्तिनिष्ठप्रकारता व्याप्तिनिष्ठ प्रकारता निरूपिता या हेतुनिष्ठप्रकारता हेतुनिष्ठप्रकारता निरूपिता या पक्षनिष्ठ विशेष्यता तन्निरूपकत्वे सति ज्ञानत्वं परामर्शस्य लक्षणं

वह्निव्याप्य धूमवान् अयं पर्वतः इत्याकारक ज्ञाने समन्वयः । अस्मिन् ज्ञाने पर्वतः विशेष्यः । पर्वतांशे धूमः प्रकारः । धूमांशे व्याप्तिः प्रकारः । व्याप्तौ वह्निः प्रकारः । प्रकारता

15 JULY Wednesday

वह्निनिष्ठा, व्याप्तिनिष्ठा, हेतुनिष्ठा विशेष्यता पर्वतनिष्ठा। व्याप्तौ हेतौ च साध्यापेक्षया व्याप्यपेक्षया च विशेष्यता वर्तते।

समानाधिकरणयोः विशेष्यता प्रकारतयोः परस्परं अवच्छेद्य अवच्छेदक भावः इति नियमानुसारेण प्रकृते हेतौ व्याप्तौ च प्रकारता इत्येव उक्तं।
एवं व्याप्तिनिष्ठ प्रकारता नाम व्याप्तिनिष्ठ प्रकारता व्याप्तिनिष्ठ विशेष्यता च। तथा हेतुनिष्ठ प्रकारता नाम हेतुनिष्ठ प्रकारता हेतुनिष्ठ विशेष्यता च इत्यर्थः॥

एवं च साध्यनिष्ठ प्रकारतायाः व्याप्तिनिष्ठ प्रकारतायाश्च निरूपितत्वं सम्बन्धः। तथा व्याप्तिनिष्ठ प्रकारतायाः हेतुनिष्ठ प्रकारतायाश्च निरूपितत्वं सम्बन्धः।

1992	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa
AUG	—	—	—	—	—	—	1	2	3	4	5	6	7	8	9	10	11	12	13	14	15
	16	17	18	19	20	21	22	23	24	25	26	27	28	29	30	31	—	—	—	—	—

हेतुनिष्ठ प्रकारतायाः पक्षनिष्ठ विशेष्यतायाश्च निरूपितत्वं सम्बन्धः।

एवं च (1) साध्यनिष्ठ प्रकारता निरूपित या व्याप्तिनिष्ठ प्रकारता = वह्निनिरूपित व्याप्तिनिष्ठ प्रकारता।

(2) व्याप्तिनिष्ठप्रकारता या हेतुनिष्ठप्रकारता = धूमनिष्ठप्रकारता।

(3) धूमनिष्ठप्रकारतया निरूपिता या विशेष्यता पर्वतनिष्ठ विशेष्यता। विशेष्यतया निरूपकं वह्निव्याप्य धूमवान् अयं पर्वतः इत्याकारक ज्ञानं। निरूपकत्वं अस्मिन् ज्ञाने वर्तते इति प्रथम दलं। ज्ञानत्वं अपि अस्मिन् ज्ञाने वर्तते इति द्वितीय दलं इति लक्षणसमन्वयः

साध्य
पक्ष — व्याप्ति
हेतु

३४

17 JULY

1992	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa
JUN	—	1	2	3	4	5	6	7	8	9	10	11	12	13	14	15	16	17	18	19	20
	21	22	23	24	25	26	27	28	29	30	—	—	—	—	—	—	—	—	—	—	—


(पक्षस्य धर्मः तस्य भावः पक्षधर्मता।
पक्षधर्मतायाः ज्ञानं पक्षधर्मताज्ञानं।
व्याप्त्या विशिष्टं। विशिष्टञ्च तत् ज्ञानं)



यत्र यत्र धूमस्तत्र तत्राग्निरिति
साहचर्य नियमो व्याप्तिः।

हेत्वधिकरण वृत्ति अत्यन्ताभावाप्रतियोगि
साध्याधिकरण वृत्तित्वं व्याप्तिः।
(सह चरतीति सहचरः। सहचरस्य
भावः साहचर्यं। साहचर्यस्य नियमः
साहचर्य नियमः।

हेतोः साध्येन साकं अव्यभिचरित
सम्बन्धः व्याप्तिः।



हेतुतावच्छेदक व्यापकधर्मावच्छिन्नस्य
साध्यतावच्छेदक व्यापकधर्मावच्छिन्नेन
व्याप्तिः सामान्य मुखे व्याप्तिः।

GA LIPATA

॥ पः पक्षता सः तद्दृशानि ॥ [illegible]

[illegible]

भगवान् सर्वज्ञः सर्वकर्तृत्वात् . [illegible]

सर्वविषयकज्ञान साध्यम्

ज्ञानत्व = साध्यतावच्छेदक

हेतु - समस्त कार्यत्व सर्वकर्तृत्व

हेतुतावच्छेदक सर्वकार्यत्व

[illegible]

20 JULY Monday

1992	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa
JUN	–	1	2	3	4	5	6	7	8	9	10	11	12	13	14	15	16	17	18	19	20
	21	22	23	24	25	26	27	28	29	30	–	–	–	–	–	–	–	–	–	–	–

पक्षधर्मता 14-10-98

व्याप्यस्य पर्वतादिवृत्तित्वं पक्षधर्मता।

पक्षनिष्ठाधिकरणता निरूपिताधेयतावत्वं पक्षधर्मता
पर्वतः वन्हिमान् धूमात् इत्यत्र धूमे समन्वयः।
धूमः पर्वते वर्तते। अतः पर्वतः अधिकरणं। धूमः आधेयः। अधिकरणता पर्वतनिष्ठा। आधेयता धूमनिष्ठा। पर्वतनिष्ठाधिकरणतायाः धूमनिष्ठ आधेयतायाश्च निरूपितत्वं सम्बन्धः।
एवं च पर्वतनिष्ठाधिकरणता निरूपित आधेयतावान् धूमः। आधेयतावत्वं धूमे वर्तते इति लक्षणसमन्वयः।

हेतोः पक्षवृत्तित्वं पक्षधर्मता अथवा हेतोः समुचित देशकालवृत्तित्वं पक्षधर्मता। नाम यस्मिन् देशे यस्मिन् काले हेतोः स्थिति दशायां तेन हेतुना साध्यस्य सिद्धिः भवति तादृश स्थितिः (देशकाल वृत्तित्वं) पक्षधर्मता।

1992	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa
AUG	—	—	—	—	—	—	1	2	3	4	5	6	7	8	9	10	11	12	13	14	15
	16	17	18	19	20	21	22	23	24	25	26	27	28	29	30	31	—	—	—	—	—

[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

पर्वतः वह्निमान् धूमात्

[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

अनुमानं द्विविधं-स्वार्थं परार्थं च.

ಸ್ವಾರ್ಥಾನುಮಾನ, ಪರಾರ್ಥಾನುಮಾನ ಎಂದು ಅನುಮಾನದಲ್ಲಿ ಎರಡು ಭಾಗಗಳು.

ಯಾವುದೇ ಒಂದು ವಿಷಯವನ್ನು ತಾನು ತಿಳಿದು ಕೊಳ್ಳಲು ಮಾಡುವ ವಿಚಾರಕ್ಕೆ ವಿಷಯವಾದಂತಹ ಯುಕ್ತಿಯು ಸ್ವಾರ್ಥಾನುಮಾನ ಎಂದು ಕರೆಯಿಸಿಕೊಳ್ಳಲ್ಪಡುತ್ತದೆ.

ಯಾವುದೇ ಒಂದು ವಿಷಯವನ್ನು ಬೇರೆಯವರಿಗೆ ತಿಳಿಸಿ ಕೊಡುವುದಕ್ಕೆ ಎಂದು ಇಚ್ಛೆಯಿಂದ ಉಪಯೋಗಿಸಲ್ಪಡುವ ಯುಕ್ತಿಗೆ ಪರಾರ್ಥಾನುಮಾನ ಎಂದು ಹೆಸರು.

स्वार्थानुमानम्

तत्र स्वार्थं स्वानुमितिहेतुः । तथाहि - स्वयमेव भूयो दर्शनेन यत्र यत्र धूमस्तत्र तत्राग्निरिति महानसादौ व्याप्तिं गृहीत्वा पर्वतसमीपं गतस्तद्गते चाग्नौ सन्दिहानः

पर्वते धूमं पश्यन् व्याप्तिं स्मरति - "यत्र यत्र धूमस्तत्र तत्राग्निः" इति। तदनन्तरम् वह्निव्याप्यधूमवानयं पर्वत इति ज्ञानमुत्पद्यते अयमेव लिङ्गपरामर्श इत्युच्यते। तस्मात्पर्वतो वह्निमानिति ज्ञानमनुमितिरुत्पद्यते। तदेतत्स्वार्थानुमानम्

॥ परार्थानुमानम् ॥

यत्तु स्वयं धूमादग्निमनुमाय परं प्रति बोधयितुं पञ्चावयव वाक्यं प्रयुज्यते तत्परार्थानुमानम्। यथा - पर्वतो वह्निमान् धूमवत्वात्, "यो यो धूमवान् स स वह्निमान्", यथा महानसम्, तथाचायम् तस्मात्तथेति"

अनेन प्रतिपादितात् लिङ्गात् परोऽप्यग्निं प्रतिपद्यते।

पञ्चावयवाः

प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि पञ्चावयवाः।

1 पर्वतो वह्निमानिति प्रतिज्ञा।

2 धूमवत्त्वादिति हेतुः।

3 यो यो धूमवान् स स वह्निमानिति उदाहरणम्

4 तथा चायमित्युपनयः।

5 तस्मात्तथेति निगमनम्।

9-2-99

1) ప్రతిజ్ఞా 2) హేతు 3) ఉదాహరణ 4) ఉపనయః
5) నిగమనం ఇవి ఐదు న్యాయ వాక్యములు.

1) साध्यवत्तया पक्षवचनं प्रतिज्ञा।
पर्वतः वह्निमान्
(समास :— साध्यं अस्मिन् अस्तीति साध्यवान्। साध्यवतः भावः साध्यवत्ता, तया साध्यवत्तया। पक्षस्य वचनं पक्षवचनम्)

पक्षविशेष्यक साध्यप्रकारक ज्ञानजनक वाक्यत्वं प्रतिज्ञावाक्यस्य लक्षणम्। अस्य लक्षणस्य पर्वतः वह्निमान् इत्याकारक वाक्ये समन्वयः। अनेन वाक्येन

14-5.

1992	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa
AUG	—	—	—	—	—	—	1	2	3	4	5	6	7	8	9	10	11	12	13	14	15
	16	17	18	19	20	21	22	23	24	25	26	27	28	29	30	31	—	—	—	—	—

JULY Saturday 25

पर्वतः वह्निमान् इत्याकारक, पर्वत-विशेष्यक, वह्निप्रकारक ज्ञानं जायते।

पर्वतः पक्षः। वह्निः साध्यं। एवं च पक्षनिष्ठ विशेष्यता निरूपकं साध्यनिष्ठ प्रकारता निरूपक ज्ञानजनकं इदं वाक्यं। ज्ञानजनकत्वं अस्मिन् वाक्ये वर्तते इति लक्षण समन्वयः।

पक्षविशेष्यक साध्यप्रकारक ज्ञानजनक वाक्यत्वं प्रतिज्ञा वाक्यस्य लक्षणं।

JULY Sunday 26

पक्षः विशेष्यः। विशेष्यता पक्षनिष्ठा। साध्यं प्रकारः। प्रकारता साध्यनिष्ठा। पक्षनिष्ठविशेष्यतायाः साध्यनिष्ठप्रकारतायाश्च निरूपकं इदं ज्ञानं। इदं च ज्ञानं पक्षः साध्यवान् इत्याकारक वाक्येन जायते। एवं च इदं ज्ञानं जन्यं। वाक्यं जनकं। जनकता वाक्यनिष्ठा। जन्यता ज्ञाननिष्ठा। ज्ञाननिष्ठजन्यतायाः वाक्यनिष्ठ जनकतायाश्च निरूपितत्वं सम्बन्धः

27 JULY Monday

1992	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa
JUN	–	1	2	3	4	5	6	7	8	9	10	11	12	13	14	15	16	17	18	19	20
	21	22	23	24	25	26	27	28	29	30	–	–	–	–	–	–	–	–	–	–	–

एवं च पक्षनिष्ठ विधेयता निरूपक साध्य निष्ठ प्रकारता निरूपक ज्ञाननिष्ठ जन्यता निरूपित जनकत्वावत् इदं वाक्यं। जनकतावत्वं वाक्ये वर्तते।

2) हेतुः – पञ्चम्यन्तं लिङ्ग प्रतिपादकं वचनं हेतुः।
पञ्चम्यन्तत्वे सति लिङ्गविषयकज्ञान जनकवाक्यत्वं हेतुवाक्यस्य लक्षणं। अस्य लक्षणस्य धूमात् इत्याकारक वाक्ये समन्वयः। धूमात् – धूमस्य सद्भावात्।

3) उदाहरणं – व्याप्ति प्रदर्शन पूर्वक दृष्टान्ताभिधानं। उदाहरणं – यो यो धूमवान् सो सो वन्हिमान् यथा महानसः।
[illegible]

4) उपनयः — तथा च अयं। वन्हिव्याप्य धूमवान् अयं पर्वतः।
व्याप्ति विशिष्ठ लिङ्ग प्रतिपादकं वचनमुपनयः। साध्यव्याप्यहेतुमत्वात् इदं साध्यवान्।

5) निगमनं – तस्मात् तथा – वन्हिव्याप्य धूमवत्वात् पर्वतः वन्हिमान्।

हेतुसाध्यवत्तया पक्षप्रतिपादकं वचनं – निगमनं

(129) 10-2-99 147

1992 Su Mo Tu We Th Fr Sa Su Mo Tu We Th Fr Sa Su Mo Tu We Th Fr Sa
AUG — — — — — — 1 2 3 4 5 6 7 8 9 10 11 12 13 14 15
16 17 18 19 20 21 22 23 24 25 26 27 28 29 30 31 — — — — —

JULY 28 Tuesday

स्वार्थानुमितिपरार्थानुमित्योर्लिङ्ग परामर्श एव करणं। तस्माल्लिङ्गपरामर्शोऽनुमानम्।

लिङ्गं त्रिविधम्
1) अन्वयव्यतिरेकि
2) केवलान्वयि (3) केवलव्यतिरेकि चेति।

अन्वयेन व्यतिरेकेण च व्याप्तिमदन्वय व्यतिरेकि। यथा वह्नौ साध्ये धूमवत्वम्। यत्र धूमस्तत्राग्निर्यथा — महानसमित्यन्वयव्याप्तिः।

यत्र वह्निर्नास्ति तत्र धूमोपि नास्ति यथा ह्रदः इति व्यतिरेकव्याप्तिः।

1) हेत्वधिकरणवृत्ति अत्यन्ताभावाप्रतियोगि साध्याधिकरण वृत्तित्व अन्वयव्याप्तिः।

[illegible]
[illegible]
[illegible]

(2) साध्याभाव व्यापकाभाव प्रतियोगित्वं व्यतिरेक व्याप्तिः ।

एतत् द्वयं पर्वतः वह्निमान् धूमात् इत्यत्र धूमे वर्तते । अतः पर्वते वह्निसाधनार्थं धूमः लिङ्गः ।

(1) हेतुः धूमः, हेत्वधिकरणं महानसः । तद्वृत्तिः यः अभावः । गजाद्यभावः अभावप्रतियोगी गजादि । अभावाप्रतियोगी यत् साध्यं वह्निरूप साध्यं । साध्याधिकरणं महानसः । तद्वृत्ति धूमः । तद्वृत्तित्वं धूमे वर्तते इति अन्वय व्याप्तिः ।

(2) साध्यं वह्निः । साध्याभावः वह्न्यभावः । साध्याभावव्यापकः यः अभावः धूमाभावः । अभावप्रतियोगि धूमः । अभावप्रतियोगित्वं धूमे वर्तते इति व्यतिरेक व्याप्तिः ।

तथाहि :- यत्र यत्र वह्न्यभावः तत्र तत्र धूमाभावः यथा सरोवरं । एवं च यत्र यत्र वह्निः नास्ति

1992	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa
AUG	—	—	—	—	—	—	1	2	3	4	5	6	7	8	9	10	11	12	13	14	15
	16	17	18	19	20	21	22	23	24	25	26	27	28	29	30	31	—	—	—	—	—

तत्र तत्र धूमोऽपि नास्ति । एवं च
वह्न्यभाव प्रति धूमाभावः व्यापकः

① व्याप्ति ग्राहकस्थानम् दृष्टान्तः ।
पर्वतः वह्निमान् धूमात् इत्यत्र
महानसः दृष्टान्तः ।
② हेतु साध्य सम्बन्धः व्याप्तिः ।
ಹೇತು ಸಾಧ್ಯ ಸಂಬಂಧವೇ ವ್ಯಾಪ್ತಿ [illegible]

महानसे धूमः वर्तते वह्निरपि
वर्तते । एवं च यत्र यत्र धूमः
वर्तते, तत्र तत्र वह्निः वर्तते इति
ज्ञानं जायते । अतः धूमवह्न्योः
व्याप्तिः महानसे ज्ञायते इति
महानसः दृष्टान्तः ।

अनुमापकं लिङ्गम् = [illegible]
[illegible]

[illegible]

① ಹೇತು ಸಾಧ್ಯ ಸಂಬಂಧಕ್ಕೆ ವ್ಯಾಪ್ತಿಯೆಂದು ಹೆಸರು. ಈ ವ್ಯಾಪ್ತಿಯು ಎರಡು ಪ್ರಕಾರಗಳು ① ಅನ್ವಯ ವ್ಯಾಪ್ತಿ ② ವ್ಯತಿರೇಕ ವ್ಯಾಪ್ತಿ ಎಂದು.

ಇದರಲ್ಲಿ ಹೇತುವಿನ ಸಾಧ್ಯದಿಂದ ಕೂಡುವ ವ್ಯಾಪ್ತಿಯು ಅನ್ವಯ ವ್ಯಾಪ್ತಿಯು. ಉದಾ:- ಎಲ್ಲಿ ಎಲ್ಲಿ ಹೇತುವು ಇರುತ್ತದೋ ಅಲ್ಲಿ ಅಲ್ಲಿ ಸಾಧ್ಯವು ಇರುತ್ತದೆ, ಇದೇ ಅನ್ವಯ ವ್ಯಾಪ್ತಿಯನ್ನು ಇರುವ ಕ್ರಮ.

ಎಲ್ಲಿ ಎಲ್ಲಿ ಧೂಮವು ಇರುತ್ತದೋ ಅಲ್ಲಲ್ಲಿ ಅಗ್ನಿಯು ಇರುತ್ತದೆ.

① ಹೇತುವು ಇದ್ದಲ್ಲಿ ಸಾಧ್ಯವಿರುತ್ತದೆ (ಅನ್ವಯ ವ್ಯಾಪ್ತಿ)

② ಸಾಧ್ಯವು ಇರದಿದ್ದರೆ ಹೇತುವು ಇರುವುದಿಲ್ಲ (ವ್ಯತಿರೇಕ ವ್ಯಾಪ್ತಿ)

ಸಾಧ್ಯಾಭಾವಕ್ಕೆ ವ್ಯಾಪಕವಾದ ಅಭಾವವು ಯಾವುದೋ ಅದಕ್ಕೆ ಹೇತುವು ಪ್ರತಿಯೋಗಿ ಆಗುತ್ತದೆ. ಆದ್ದರಿಂದ ಪ್ರತಿಯೋಗಿತ್ವವು ಹೇತುವಿ

ಉದಾ:- ಎಲ್ಲೆಲ್ಲಿ ಅಗ್ನಿಯು ಇಲ್ಲವೋ ಅಲ್ಲೆಲ್ಲಿ ಧೂಮವಿಲ್ಲ ಎಂಬ ಜ್ಞಾನವು ಹುಟ್ಟುತ್ತದೆ. ಇದೇ ವ್ಯತಿರೇಕ ವ್ಯಾಪ್ತಿಯನ್ನು ಅರಿಯುವ ಕ್ರಮ.

पर्वतः वह्निमान् धूमात्

ಎಂಬಲ್ಲಿ ಧೂಮದಲ್ಲಿ ಅನ್ವಯ ಮತ್ತು ವ್ಯತಿರೇಕ ವ್ಯಾಪ್ತಿಗಳನ್ನು ತಿಳಿಯಬಹುದು.

(1) ಹೇತುವು ಧೂಮ. ಈ ಧೂಮವು ಅಡಿಗೆ ಮನೆಯಲ್ಲಿರುತ್ತದೆ. ಅಂದರೆ ಹೇತ್ವಧಿಕರಣವಾಗಿದೆ. ಈ ಅಡಿಗೆ ಮನೆಯಲ್ಲಿ ಘಟಾದಿಗಳು ಇಲ್ಲ. ಅಂದರೆ ಘಟಾದಿಗಳ ಅಭಾವವಿರುತ್ತದೆ. ಈ ಅಭಾವಕ್ಕೆ ಪ್ರತಿಯೋಗಿ ಘಟಾದಿಗಳು. ವಹ್ನಿಯು ಅಲ್ಲಿರುವುದರಿಂದ ಅಲ್ಲಿ ವಹ್ನಿಯ ಅಭಾವವಿಲ್ಲ. ಆದ್ದರಿಂದ ಅಡಿಗೆ ಮನೆಯಲ್ಲಿರುವ ಅಭಾವಕ್ಕೆ ವಹ್ನಿಯು ಪ್ರತಿಯೋಗಿ ಅಲ್ಲ. ಅಂದರೆ ಅಪ್ರತಿಯೋಗಿ ಆಗಿದೆ. ಈ ವಹ್ನಿಯು ಸಾಧ್ಯವು. ಈ ಸಾಧ್ಯಕ್ಕೆ ಅಧಿಕರಣ ಅಡಿಗೆ ಮನೆ. ಅಲ್ಲಿ ಧೂಮವಿರುತ್ತದೆ.

(ಸಾಧನ ಬಿನಾ ಸಾಧ್ಯ ಅಸತ್ತ್ವ ಕೇವಲ [illegible] ವ್ಯಾಪ್ತಿಃ)

1992	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa
JUL	–	–	–	1	2	3	4	5	6	7	8	9	10	11	12	13	14	15	16	17	18
	19	20	21	22	23	24	25	26	27	28	29	30	31	–	–	–	–	–	–	–	–

ಆದ್ದರಿಂದ ಧೂಮದಲ್ಲಿ ಅಗ್ನಿಯಿಂದ ಅನ್ವಯ ವ್ಯಾಪ್ತಿ ಬಂದಿದೆ.

(2) ವ್ಯತಿರೇಕ ವ್ಯಾಪ್ತಿ

ಎಲ್ಲಿ ವಹ್ನಿಯಿಲ್ಲವೋ ಅಲ್ಲಿ ಧೂಮವಿಲ್ಲ.

ಉದಾ:- ಸರೋವರದಲ್ಲಿ ವಹ್ನಿ ಇಲ್ಲ, ಧೂಮವಿಲ್ಲ. ಆದ್ದರಿಂದ ವಹ್ನಿ ಅಭಾವವು ವ್ಯಾಪ್ಯವಾಗಿದೆ ಅಂದರೆ ಕಡಿಮೆ ದೇಶದಲ್ಲಿದೆ. ಧೂಮಾಭಾವವು ವ್ಯಾಪಕವಾಗಿದೆ ಅಂದರೆ ಹೆಚ್ಚು ದೇಶದಲ್ಲಿದೆ.

ಹೇತು ಸಾಧ್ಯಗಳಿಗೆ ವ್ಯಾಪ್ತಿಯನ್ನು ತಿಳಿದು ತೋರಿಸುವ ಸ್ಥಲ ದೃಷ್ಟಾಂತವು.

पर्वतः वन्हिमान धूमात ಎಂಬಲ್ಲಿ ಅಡಿಗೆ ಮನೆ ದೃಷ್ಟಾಂತವು. ಅಡಿಗೆ ಮನೆಯಲ್ಲಿ ಧೂಮವುಂಟು. ಮತ್ತು ವಹ್ನಿಯೂ ಉಂಟು. ಎಂಬ ವ್ಯಾಪ್ತಿ ಜ್ಞಾನವು ಅನೇಕ ಸಲ ಕಂಡಾಗ ಧೂಮ ವಹ್ನಿಗಳಿಗೆ ವ್ಯಾಪ್ತಿ ನಿಶ್ಚಯವಾಗುವುದು. ಆದ್ದರಿಂದ ಅದು ದೃಷ್ಟಾಂತವು.

अन्वयमात्रव्याप्तिकं केवलान्वयि

यथा - घटोऽभिधेयः प्रमेयत्वात् पटवत् ।
अत्र प्रमेयत्वाभिधेयत्वयोर्व्यतिरेकव्याप्तिः
नास्ति सर्वस्यापि प्रमेयत्वादभिधेयत्वाच्च

(1) यथा घटः अभिदेयः प्रमेयत्वात् ।
घटः = ಈ ಘಟವು अभिदेयः ಶಬ್ದ ವಾಚ್ಯ
ವಾಗಿದೆ । प्रमेयत्वात् ಅದು ಪ್ರಮಾ ಜ್ಞಾನದ
ವಿಷಯವಾಗಿರುವದರಿಂದ.

(1) ಇದರ ಅನ್ವಯ ವ್ಯಾಪ್ತಿ :— यत्र यत्र
प्रमेयत्वं तत्र तत्र अभिधेयत्वं ।

(2) ವ್ಯತಿರೇಕ ವ್ಯಾಪ್ತಿ :— यत्र यत्र
अभिदेयत्वाभावः तत्र तत्र प्रमेयत्वाभावः
ಎಂದು ವ್ಯತಿರೇಕ ವ್ಯಾಪ್ತಿಯನ್ನು ಹೇಳಲು
ಬರುವುದಿಲ್ಲ. ಏಕೆಂದರೆ ಸಕಲ ಪದಾರ್ಥ
ಗಳೂ ಶಬ್ದ ವಾಚ್ಯಗಳೇ ಇರುವವು. ಆದ್ದರಿಂದ
यत्र अभिदेयत्वाभावः ಎಂದು ಹೇಳಲು
ಬರುವುದಿಲ್ಲ. ಇದರಿಂದಲೇ ಕೇವಲ

54

5 AUGUST Wednesday 18-3-99

1992	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa
JUL	–	–	–	1	2	3	4	5	6	7	8	9	10	11	12	13	14	15	16	17	18
	19	20	21	22	23	24	25	26	27	28	29	30	31	–	–	–	–	–	–	–	–

[illegible]

व्यतिरेकमात्रव्याप्तिकं केवलव्यतिरेकि।

यथा पृथिवीतरेभ्यो भिद्यते गन्धवत्त्वात्; यदितरेभ्यो न भिद्यते न तद्गन्धवत्, यथा - जलम्। न चेयं तथा। तस्मान्न तथेति।

अत्र यद्गन्धवत् तदितरेभ्यो भिद्यत इत्यन्वय दृष्टान्तो नास्ति, पृथिवीमात्रस्य पक्षत्वात्।

व्यतिरेकमात्रव्याप्तिकं केवलव्यतिरेकि।

(समासः) केवलं व्यतिरेकयोः व्याप्तिः यस्मिन् तत् व्यतिरेकमात्रव्याप್तिकं।

व्यतिरेकयोः ಎಂದರೆ ಎರಡು ಅಭಾವಗಳ ಎಂದು ಅರ್ಥ. ಇದು [illegible] [illegible] (ಕಾರ್ಯ [illegible])

अन्वयव्याप्ति शून्यत्वे सति व्यतिरेकव्याप्तिमत्वं केवलव्यतिरेकि लिङ्गस्य लक्षणं।

(केवलं व्यतिरेकः अस्य अस्तीति केवलव्यतिरेकि। केवलव्यतिरेकि च तत् लिङ्गञ्च केवलव्यतिरेकिलिङ्गम् - तस्य)

समन्वयस्तु = पृथिवी इतरेभ्यो भिद्यते गन्धवत्वात् इत्यत्र गन्ध समन्वयः।

अत्र - यत्र गन्धः तत्र इतरभेदः इति व्याप्तिं वक्तुं न शक्यते। तथाहि — गन्धः पृथिव्यां एव वर्तते। सा च पृथिवी अत्र पक्षः। पक्षान्तरभावेन व्याप्ति ग्रहणं न कार्यं। अतः अत्र अन्वयव्याप्ति ग्राहकस्थानम् नास्ति इति व्यतिरेकव्याप्तिरेव आश्रयणीया।

व्यतिरेकव्याप्ति नाम साध्याभावव्यापकाभाव प्रतियोगित्वं।
यत्र इतरभेदाभावः तत्र गन्धाभावः


(132) 7 56 K

7 AUGUST
Friday

1992	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa
JUL	—	—	—	1	2	3	4	5	6	7	8	9	10	11	12	13	14	15	16	17	18
	19	20	21	22	23	24	25	26	27	28	29	30	31	—	—	—	—	—	—	—	—

D

साध्य इतरभेदः। साध्याभावः इतरभेदाभावः। साध्याभावव्यापकी भूतः यः अभावः गन्धाभावः। अभावप्रतियोगि गन्धः। अभाव प्रतियोगित्वं गन्धे वर्तते इति लक्षण समन्वयः



भावप्रत्ययस्य स्वप्रकृत्यर्थे प्रकारतया भासमानो यो धर्मः तद्वाचकत्वं।

भावप्रत्ययस्य गन्धवत्वं इत्यत्र त्व प्रत्ययस्य = त्वं भावप्रत्ययः स्वप्रकृतिः गन्धवत् इति। प्रकृत्यर्थः गन्धवत् पदार्थः। तत्र स्वप्रकृत्यर्थे = गन्धवत् पदार्थे प्रकारतया भासमानः यः धर्मः गन्धरूप धर्मः। तद्वाचकः त्व प्रत्ययः। तद्वाचकत्व त्व प्रत्यये।

(भावप्रत्ययः ಎಂದರೆ त्व प्रत्यय
भाव [illegible] ಎಂದರೆ [illegible]
[illegible] [illegible])

सन्दिग्धसाध्यवान् पक्षः
यथा धूमवत्वे हेतौ पर्वतः।
[illegible]

सन्दिग्धं च तत् साध्यञ्च सन्दिग्धसाध्यं। सन्दिग्धसाध्यं अस्मिन् अस्तीति सन्दिग्धसाध्यवान्।

साध्यसाध्याभाव प्रकारक संशय-विशेष्यत्वं पक्षस्य लक्षणं।

समन्वयः — पर्वतः वह्निमान् धूमात् इत्यत्र पर्वते समन्वयः।

पर्वते वह्निः वर्तते न वा इति संदेहः वर्तते। साध्यं वह्निः। साध्याभावः वह्न्यभावः। एतत् उभयं अस्मिन् संदेहे प्रकारतया भासते। एवं च साध्यसाध्याभावप्रकारकः यः संशयः? पर्वतः वह्निमान् वा वह्न्यभाववान् वा इति संशयः। अस्मिन् संशये पर्वतः विशेष्यः।

158

10 AUGUST Monday

1992	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa
JUL	—	—	—	1	2	3	4	5	6	7	8	9	10	11	12	13	14	15	16	17	18
	19	20	21	22	23	24	25	26	27	28	29	30	31	—	—	—	—	—	—	—	—

~~संशय विशेषत्वं पर्वते आयातं इति~~
लक्षण समन्वयः।

[illegible]

(1) [illegible]

old book Page 12 23-9-99 159

1992 Su Mo Tu We Th Fr Sa Su Mo Tu We Th Fr Sa Su Mo Tu We Th Fr Sa
SEP — — 1 2 3 4 5 6 7 8 9 10 11 12 13 14 15 16 17 18 19
20 21 22 23 24 25 26 27 28 29 30

AUGUST 11
Tuesday

निश्चितसाध्यवान् सपक्षः

हेतुः साध्यव्याप्यः इति ज्ञानम्
अथवा साध्यव्याप्यत्वेन ज्ञातं लिङ्गः
अनुमानं।

निश्चित साध्यवान् सपक्षः

साध्यप्रकारक निश्चय विशेषत्वं सपक्षस्य लक्षणं
पर्वतः वन्हिमान् धूमात् इत्यत्र
महानसः सपक्षः, तत्र समन्वयः।

साध्यं वन्हिः। साध्यप्रकारकः यः
निश्चयः? महानसः वन्हिमान्
इत्याकारक महानसः विशेष्यक
वन्हिप्रकारक निश्चयः। अस्मिन्
निश्चये महानसः विशेष्यः। विशेषत्वं
महानसेः वर्तते इति लक्षण समन्वयः

19-6-2000

160 12 AUGUST Wednesday

निश्चितसाध्याऽभाववान् विपक्षः।
यथा - तत्रैव महाह्रदः।

साध्याभावप्रकारक निश्चयविशेष्यत्वं विपक्षस्य लक्षणं। पर्वतः वह्निमान् धूमात् इत्यत्र ह्रदः विपक्षः तत्र समन्वयः।
तथाहि - साध्यं वह्निः। साध्याभावः वह्न्यभावः। साध्याभावप्रकारकः यः निश्चयः ? ह्रदः वह्न्यभाववान् इत्याकारकं, ह्रदः विशेष्यक, वह्न्यभावप्रकारक निश्चयः। अस्मिन् निश्चये ह्रदः विशेष्यः। निश्चय-विशेष्यत्वं ह्रदे वर्तते इति लक्षण समन्वयः।

सव्यभिचारविरुद्धसत्प्रतिपक्षाऽसिद्धबाधिताः पञ्च हेत्वाभासाः।

(व्यभिचारेण सहितः सव्यभिचारः। हेतुवत् अवभासते इति हेत्वाभासाः)

1 सव्यभिचारोऽनैकान्तिकः। सः त्रिविधः साधारणाऽसाधारणानुपसंहारिभेदात्। हेतोः साध्याभाववद्वृत्तित्वं व्यभिचारः।

(1) तत्र साध्याभाववद्वृत्तिः साधारणोऽनैकान्तिकः

यथा – पर्वतो वन्हिमान् प्रमेयत्वादिति। (तत्र) प्रमेयत्वस्य वन्ह्यभाववति ह्रदे विद्यमानत्वात्।

साध्यं वह्निः। साध्याभावः वह्न्यभावः। साध्याभाववत् ह्रदः। तद्वृत्ति प्रमेयत्वरूप हेतुः। तद्वृत्तित्वं प्रमेयत्वे वर्तते इति प्रमेयत्व रूप हेतुः वर्तते इति व्यभिचारः।

पर्वतः धूमवान् वन्हिमत्वात्

ह्रदे.

[illegible]

14 AUGUST
Friday

1992	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa
JUL	—	—	—	1	2	3	4	5	6	7	8	9	10	11	12	13	14	15	16	17	18
	19	20	21	22	23	24	25	26	27	28	29	30	31	—	—	—	—	—	—	—	—

(२) सर्वसपक्षविपक्ष व्यावृत्तः पक्षमात्रवृत्तिः असाधारणोऽनैकान्तिकः। यथा शब्दः नित्यः शब्दत्वादिति।

शब्दत्वं हि सर्वेभ्यो नित्येभ्योऽनित्येभ्यश्च व्यावृत्तं शब्दमात्रवृत्ति।

(३) अन्वयव्यतिरेक दृष्टान्तरहितोऽनुपसंहारी यथा सर्वमनित्यं प्रमेयत्वादिति। अत्र सर्वस्यापि पक्षत्वाद् दृष्टान्तो नास्ति।

([illegible])

साध्याभावव्याप्तो हेतुः विरुद्धः।

यथा - शब्दो नित्यः कृतकत्वादिति। अत्र कृतकत्वं हि नित्यत्वाभावेनाऽनित्यत्वेन व्याप्तम्।

साध्यं नित्यत्वं। साध्याभावः नित्यत्वाभावः साध्याभावेन व्याप्तः कृतकत्वरूप हेतुः।

यस्य साध्याभावसाधकं हेत्वन्तरं विद्यते स सत्प्रतिपक्षः। यथा - शब्दः नित्यः श्रावणत्वाच्छब्दत्ववत्। शब्दोऽनित्यः कार्यत्वाद् घटवत्।



असिद्धः त्रिविधः - आश्रयासिद्धः। स्वरूपासिद्धः, व्याप्यत्वासिद्धश्चेति।

आश्रयासिद्धः

गगनारविन्दं सुरभि अरविन्दत्वात् सरोजारविन्दवत्। अत्र गगनारविन्दमाश्रयः स च नास्त्येव।

अप्रसिद्धपक्षकत्वं आश्रयासिद्धहेतोः लक्षणं। अप्रसिद्धः यः पक्षः - गगनारविन्दरूप पक्षः। तद्दृश पक्षकत्वं अरविन्दस्य।

24-6-2000

17 AUGUST
Monday


1992	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa
JUL	–	–	–	1	2	3	4	5	6	7	8	9	10	11	12	13	14	15	16	17	18
	19	20	21	22	23	24	25	26	27	28	29	30	31	–	–	–	–	–	–	–	–

स्वरूपासिद्धो - यथा शब्दो गुणश्चाक्षुषत्वात् । अत्र चक्षुषत्वं शब्दे नास्ति शब्दस्य श्रावणत्वात् । ಶಬ್ದ ಶ್ರವಣ. ಚಕ್ಷುಷತ್ವ ಶಬ್ದದಲ್ಲಿ [illegible] ಸ್ವರೂಪಾಸಿದ್ಧಿ

हेत्वभाववत् पक्षकत्वं स्वरूपासिद्ध हेतोः लक्षणं ।

हेतुः चक्षुषत्वं । हेत्वभावः चाक्षुषत्वाभावः

चाक्षुषत्वाभाववान् यः पक्षः, शब्द रूप पक्षः तादृशपक्षकत्वं चाक्षुषत्वरूप हेतोः ।



सोपाधिको हेतुर्व्याप्यत्वासिद्धः । साध्यव्यापकत्वे सति साधनाव्यापकत्वमुपाधित्वम् । साध्यसमानाधिकरणात्यन्ताभावाप्रतियोगित्वम् - साध्यव्यापकत्वम् ।

साधनवन्निष्ठात्यन्ताभावप्रतियोगित्वं - साधनाव्यापकत्वं । यथा पर्वतो धूमवान् वह्निमत्वादित्यत्राऽऽर्द्रेन्धन संयोग उपाधिः तथा हि यत्र धूमस्तत्राऽऽर्द्रेन्धन संयोग इति

ಹೇತು:- ನಿಯಮಿತ [illegible], ಸ್ವನಿಷ್ಠ ವ್ಯಾಪ್ತಿ ಧೂಮ
ಉಪಾಧಿ - ಇತರ ಅನುಗತ ಅವ್ಯಭಿಚಾರ = ಉಪಾಧಿ

[illegible] = 27/18 Page

साध्यव्यापकत्वम् । यत्र वह्निस्तत्रार्द्रेन्धन संयोगो नास्ति अयोगोलके आर्द्रेन्धनसंयोगाभावादिति साधनाऽव्यापकत्वम्

एवं साध्यव्यापकत्वे सति साधनाऽव्यापकत्वादार्द्रेन्धन संयोग उपाधिः ।

सोपाधिकत्वाद्वह्निमत्वं व्याप्यत्वासिद्धम्

सोपाधिको हेतुर्व्याप्यत्वासिद्धः ।
उपाधिना सहितः सोपाधिकः ।
व्याप्यत्वं असिद्धं यस्य सः व्याप्यत्वासिद्धः ।

साध्यव्यापकत्वे सति साधनाव्यापकत्वमुपाधेः लक्षणं ।

पर्वतः धूमवान् वह्निमत्वात् इत्यत्र आर्द्रेन्धन संयोगः उपाधिः । तत्र आर्द्रेन्धन संयोगे समन्वयः

(1) साध्यं धूमः । साध्यव्यापकः आर्द्रेन्धन संयोगः
साध्यव्यापकत्वं आर्द्रेन्धन संयोगे वर्तते ।

[illegible] 1872


साधनं (हेतुः) वन्हिः। तस्य आर्द्रेन्धन संयोगः अव्यापकः (व्यापको न भवति) इति साधनाव्यापकत्वं आर्द्रेन्धन संयोगे वर्तते इति आर्द्रेन्धन संयोगे उपाधि लक्षण निरूपणम्

(1) साध्यव्यापकत्वं नाम साध्यसमानाधिकरणात्यन्ताभावाप्रतियोगित्वम् :—
साध्यं धूमः। साध्याधिकरणं महानसः।
साध्यसमानाधिकरणः यः अत्यन्ताभावः।
घटात्यन्ताभावः। अभावप्रतियोगि घटः।
अभाव अप्रतियोगि आर्द्रेन्धन संयोगः।
अभावाप्रतियोगित्वं आर्द्रेन्धन संयोगे।

(2) साधनाव्यापकत्वं नाम साधनवन्निष्ठात्यन्ताभावप्रतियोगित्वं।
साधनं वन्हिः। साधनवत् अयोगोलकं तन्निष्ठः यः अत्यन्ताभावः? आर्द्रेन्धन संयोगाभावः। कुतः इति चेत् वन्ह्यधिकरणे अयोगोलके आर्द्रेन्धनसंयोगाभावात्।
तथाच अत्यन्ताभावप्रतियोगि आर्द्रेन्धन संयोगः। अभावप्रतियोगित्वं आर्द्रेन्धन संयोगे आयातं इति आर्द्रेन्धन संयोगः उपाधिः

बाधितस्य लक्षणम्

यस्य साध्याभावः प्रमाणान्तरेण निश्चितः सः बाधितः। यथा - वह्निरनुष्णो द्रव्यत्वादिति। अत्राऽनुष्णत्वं साध्यं, तदभावः उष्णत्वं स्पर्शन प्रत्यक्षेण गृह्यते इति बाधितत्वम्।



(1) हेतोः साध्याभाववद्वृत्तित्व व्यभिचारः

ಸಾಧ್ಯವಿರುವ ಸ್ಥಾನದಲ್ಲಿ ಹೇತುವು ಇದ್ದು, ಸಾಧ್ಯವು ಇಲ್ಲದೆ ಇದ್ದ ಸ್ಥಾನದಲ್ಲೂ ಕೂಡ ಅಂದರೆ ಸಾಧ್ಯಾಭಾವವು ಇದ್ದಂತಹ ಸ್ಥಾನದಲ್ಲಿ ಹೇತುವು ಬಂದರೆ ಆ ಹೇತುವಿಗೆ ವ್ಯಭಿಚಾರ ದೋಷವುಂಟು ಎಂದರೆ ಹೇತುವು ವ್ಯಭಿಚಾರಿ.

ಉದಾಹರಣೆ:- पर्वतः धूमवान् वह्निमत्वात् ಎಂದು ಅನುಮಾನ ಮಾಡಿದಾಗ ಈ ಅನುಮಾನದಲ್ಲಿ ಸಾಧ್ಯವು ಧೂಮವಾಗಿರುತ್ತದೆ. ಸಾಧ್ಯವು ಇಲ್ಲದಿರುವ ಅಂದರೆ ಸಾಧ್ಯಾಭಾವವಿರುವ ಅಯೋಗೋಲಕಾದಿ ಸ್ಥಾನಗಳಲ್ಲಿ ವಹ್ನಿಯು ಇರುವುದರಿಂದ ವಹ್ನಿಗೆ ಸಾಧ್ಯಾಭಾವವದ್ ವೃತ್ತಿತ್ವ ಎಂಬ ವ್ಯಭಿಚಾರ ದೋಷ ಬರುತ್ತದೆ

(2) साध्याभावव्याप्तो हेतुः विरुद्धः। साध्यस्य अभावः साध्याभावः। साध्याभावेन

7-7-2000

21 AUGUST Friday

1992 Su Mo Tu We Th Fr Sa Su Mo Tu We Th Fr Sa Su Mo Tu We Th Fr Sa
JUL — — — 1 2 3 4 5 6 7 8 9 10 11 12 13 14 15 16 17 18
19 20 21 22 23 24 25 26 27 28 29 30 31 — — — — — — —

व्याप्यं साध्याभावव्याप्यं ।

ವಿರುದ್ಧ ಎಂದರೆ ವಿರೋಧ ದೋಷ ಎಂದರ್ಥ.
ಯಾವ ಅನುಮಾನದಲ್ಲಿ ಹೇತುವು ಸಾಧ್ಯಾಭಾವ
ದಿಂದಲೇ ಕೂಡಿರುವುದೋ ಅಂತಹ ಹೇತುವಿಗೆ
ವಿರೋಧ ದೋಷವುಂಟು ಎಂದರೆ ಆ
ಹೇತುವು ವಿರುದ್ಧವಾಗಿದೆ. ಸಾಧ್ಯದಿಂದ ಕೂಡಿ-
ಕೊಂಡಿರದೇ, ಸಾಧ್ಯಾಭಾವದಿಂದಲೇ ಕೂಡಿ-
ಕೊಂಡಿದ್ದರೆ ಆ ಹೇತುವಿಗೆ ವಿರೋಧ ದೋಷ
ವುಂಟು ಎಂದರೆ ಆ ಹೇತುವು ವಿರುದ್ಧ.

ಉದಾಹರಣೆಗೆ - शब्दः नित्यः कृतकत्वात् ।
ಎಂಬಲ್ಲಿ ಕೃತಕತ್ವ ರೂಪ ಹೇತುವಿಗೆ ವಿರೋಧ
ದೋಷವುಂಟು ಏಕೆಂದರೆ ಯಾವುದು ಕೃತಕ
ವಾಗಿದೆಯೋ ಅದು ಅನಿತ್ಯವಾಗಿದೆ, ನಿತ್ಯವು ಅಲ್ಲ
ಎಂದು ಎಲ್ಲರಿಗೂ ಅನುಭವಕ್ಕೆ ಬಂದಿದೆ.
ಆದ್ದರಿಂದ यत्र कृतकत्वं तत्र नित्यत्वं
ಎಂಬ ವ್ಯಾಪ್ತಿಯು ಇಲ್ಲ, ಅಂದರೆ ಹೇತುವಿಗೆ
ಸಾಧ್ಯದ ಸಂಬಂಧವಿಲ್ಲ. ಆದರೆ यत्र कृतकत्वं
तत्र नित्यत्वाभावः नाम अनित्यत्वं ಎಂಬ
ವ್ಯಾಪ್ತಿಯೇ ಅನುಭವಸಿದ್ಧವಾದ್ದರಿಂದ कृतकत्वे
नित्यत्वाभाव ಎಂಬ ವ್ಯಾಪ್ತಿಯು ಬಂದಿತು.
ಅಂದರೆ ಸಾಧ್ಯಾಭಾವದಿಂದ ವ್ಯಾಪ್ತಿಯು ಇರುತ್ತದೆ.

ಇಂತಹ ಹೇತುವಿಗೆ ವಿರುದ್ಧ ಎಂದು ಹೇಳುತ್ತಾರೆ.
ಇಂತಹ ದೋಷಕ್ಕೆ ವಿರೋಧ ಎಂದು
ಹೇಳುತ್ತಾರೆ. (ವ್ಯಾಪ್ತಿವಿರುದ್ಧ ವ್ಯಾಪ್ತಿ).

हेत्वाभाववत् पक्षकत्वं स्वरूपासिद्धस्य
हेतोः लक्षणं।

ಅನುಮಾನ ಪ್ರಯೋಗ ಮಾಡುವಾಗ ಪಕ್ಷದಲ್ಲಿ
ಹೇತುವೇ ಇಲ್ಲದಿದ್ದರೆ ಆ ಹೇತುವಿಗೆ ಸ್ವರೂಪಾ-
ಸಿದ್ಧ ದೋಷವುಂಟು ಎಂದು ಕರೆಯಲ್ಪಡುತ್ತದೆ.
ಆಗ ಆ ಹೇತುವಿಗೆ ಸ್ವರೂಪಾಸಿದ್ಧ ಎನ್ನುತ್ತಾರೆ.

ಉದಾ:- ह्रदः वह्निमान् धूमात्
ಪ್ರಯೋಗ ಮಾಡುವಾಗ ಪಕ್ಷವಾದ ಸರೋವರದಲ್ಲಿ
ಹೇತುವಾದ ಧೂಮವು ಇಲ್ಲವಾದ್ದರಿಂದ ಆ
ಧೂಮಕ್ಕೆ ಸ್ವರೂಪಾಸಿದ್ಧ ದೋಷ ಬಂದಿದೆ.

हेतुः धूमः। हेत्वाभावः धूमाभावः। हेत्वभाववान्
पक्षः ह्रदरूप पक्षः। तद्वत्ता पक्षकत्वं धूमे
वर्तते इति धूमः असिद्धः।

170 बाधः

24 AUGUST Monday

1992	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa
JUL	—	—	—	1	2	3	4	5	6	7	8	9	10	11	12	13	14	15	16	17	18
	19	20	21	22	23	24	25	26	27	28	29	30	31	—	—	—	—	—	—	—	—

साध्याभाववत् पक्षः बाधः
(साध्यस्य अभावः साध्याभावः | साध्याभावः
अस्मिन् अस्तीति साध्याभाववान् |
साध्याभाववांश्चासौ पक्षश्च साध्याभाववत्पक्षः

साध्याभाववत् पक्षकत्वं बाधित हेतोः लक्षणं |
ह्रदः वन्हिमान् धूमात् इत्यत्र धूमे
समन्वयः | ह्रदे वन्हिः नास्ति | एवं च
साध्यं वन्हिः | साध्याभावः वन्ह्यभावः |
साध्याभाववान् यः पक्षः | ह्रद रूप पक्षः
तादृश पक्षकत्वं धूमे वर्तते इति धूमः
बाधितः अथवा बाधदोषवान् इति |

ಅನುಮಾನ ಪ್ರಯೋಗ ಮಾಡಿದಾಗ
ಪಕ್ಷದಲ್ಲಿ ಸಾಧ್ಯವು ಇಲ್ಲದಿದ್ದರೆ ಆ
ಹೇತುವಿಗೆ ಬಾಧಿತಹೇತ್ವಾಭಾಸ ಎಂದು
ಕರೆಯಲಾಗುವುದು ಅಂದರೆ ಆ ಹೇತುವು
ಬಾಧಿತವಾಗಿದೆ ಎಂದು ಅರ್ಥ.

ह्रदः वन्हिमान् धूमात् ಎಂಬ
ಪ್ರಯೋಗ ಮಾಡಿದಾಗ ಪಕ್ಷವಾದ ಸರೋವರ
ದಲ್ಲಿ ಸಾಧ್ಯವಾದ ವಹ್ನಿಯು ಇರುವುದಿಲ್ಲ.
ಅಲ್ಲಿ ವಹ್ನಿಯ ಅಭಾವ ಇರುತ್ತದೆ.

21-6-2001 (7)

1992 Su Mo Tu We Th Fr Sa Su Mo Tu We Th Fr Sa Su Mo Tu We Th Fr Sa
SEP — — 1 2 3 4 5 6 7 8 9 10 11 12 13 14 15 16 17 18 19
20 21 22 23 24 25 26 27 28 29 30

AUGUST
Tuesday 25

ಅಂದರೆ ಸಾಧ್ಯಾಭಾವ ವಿರುವ ಬೇರೆ
ಪ್ರತ್ಯಂತರವಿದ್ದ ಧರ್ಮವು ಒಂದು ಇರುವುದು.
ಆದ್ದರಿಂದ ಈ ಧರ್ಮವು ಬಾಧಿತವಾಗಿದೆ.
ಅಂದರೆ ಬಾಧೆ ಒಂದು ಧರ್ಮದ ಪ್ರತ್ಯಕ್ಷದ್ದ
ಆಗಿದೆ.

स्वसाध्य विरुद्ध साध्याभावसाधक
हेत्वन्तरकत्वं सत्प्रतिपक्षहेतोः लक्षणं।

शब्दः अनित्यः कृतकत्वात् इत्यनुमानस्य
शब्दः नित्यः ~~कृतकत्वात्~~ श्रावणत्वात् इत्यनुमानं
प्रतिपक्षः।
समन्वयस्तु :- स्व श्रावणत्वं, स्वसाध्यं
नित्यत्वं। स्वसाध्य विरुद्धः यः
साध्याभावः १ नित्यत्वाभावः नाम
अनित्यत्वं। साध्याभावसाधकं यत्
हेत्वन्तरं १ कृतकत्वं रूप हेत्वन्तरं तादृश
हेत्वन्तरकत्वं श्रावणत्वे वर्तते इति
कृतकत्वं प्रति श्रावणत्वं प्रतिपक्षः॥

स्वसाध्यविरुद्ध साध्याभावसाधक

हेत्वन्तरकत्वं सत्प्रतिपक्षहेतोः लक्षणं॥

शब्दः नित्यः श्रावणत्वात् इत्यनुमानस्य
शब्दः अनित्यः कृतकत्वात् इत्यनुमानं
प्रतिपक्षः।
समन्वयस्तु :- स्वं कृतकत्वं। स्वसाध्यं
अनित्यत्वं। स्वसाध्यविरुद्धः यः
साध्याभावः। अनित्यत्वाभावः नाम नित्यत्वं
साध्याभावसाधक यत् हेत्वन्तरं।
श्रावणत्वरूप हेत्वन्तरम्। तद्वत्

हेत्वन्तरकत्वं कृतकत्वरूपे वर्तते इति
श्रावणत्वं प्रति कृतकत्वं प्रतिपक्षः॥

ಒಂದು ಹೇತುವಿನಿಂದ ಸಾಧಿಸಲ್ಪಡುವ
ಅರ್ಥದ (ಸಾಧ್ಯದ) ಅಭಾವವನ್ನು ಸಾಧಿಸುವ
ಇನ್ನೊಂದು ಹೇತುವು ಬಂದರೆ ಅದು
ಮೊದಲಿನ ಹೇತುವಿಗೆ ಅದು ಪ್ರತಿಪಕ್ಷ
ವಾಗುತ್ತದೆ. ಎರಡನೆ ಹೇತುವಿಗೆ ಒಂದನೆ
ಹೇತುವು ಪ್ರತಿಪಕ್ಷವಾಗುತ್ತದೆ. ಆದ್ದರಿಂದ
ಈ ಹೇತುವಿಗೆ ಪ್ರತಿಪಕ್ಷ [illegible]
ಈ ಹೇತುವು ಸತ್ಪ್ರತಿಪಕ್ಷ ಎನಿಸುತ್ತದೆ.

22-6-2001 173

1992	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa
SEP	—	—	1	2	3	4	5	6	7	8	9	10	11	12	13	14	15	16	17	18	19
	20	21	22	23	24	25	26	27	28	29	30	—	—	—	—	—	—	—	—	—	—

AUGUST 27 Thursday

बाधितस्य लक्षणं (144)

यस्य साध्याभावः प्रमाणान्तरेण निश्चितः सः बाधितः। यथा वह्निरनुष्णो द्रव्यत्वादिति। अत्र अनुष्णत्वं साध्यं, तदभाव उष्णत्वं स्पर्शनप्रत्यक्षेण गृह्यते इति बाधितत्वम्।

1) साध्याभाववत् पक्षकत्वं बाधित हेतोः लक्षणं।

साध्याभाववत् पक्षः बाधः।
(साध्यस्य अभावः। साध्याभावः अस्मिन् अस्तीति साध्याभाववान्। साध्याभाववाँश्चासौ पक्षश्च साध्याभाववत् पक्षः)

ह्रदः वह्निमान् धूमात् इत्यत्र धूमे समन्वयः। ह्रदे वह्निः नास्ति। एवं च साध्यं वह्निः। साध्याभावः वह्न्यभावः साध्याभाववान् यः पक्षः ह्रद रूप पक्षः तादृश पक्षकत्वं धूमे वर्तते इति धूमः बाधितः अथवा बाधदोषवान् इति।

28 AUGUST
Friday

1992	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa
JUL	—	—	—	1	2	3	4	5	6	7	8	9	10	11	12	13	14	15	16	17	18
	19	20	21	22	23	24	25	26	27	28	29	30	31	—	—	—	—	—	—	—	—

ಅನುಮಾನವನ್ನು ಪ್ರಮಾಣೀಕರಿಸಿದಾಗ
ಪಕ್ಷದಲ್ಲಿ ಸಾಧ್ಯತೆ ಇಲ್ಲದಿದ್ದರೆ ಆ
ಹೇಳುವಿಕೆ ಖಾತ್ರಿ [illegible] ಎಂದು
ತಿಳಿಯುತ್ತೇವೆ. ಅಂದರೆ ಆ ಹೇಳುವು
ಖಾತರಿಯಾಗಿದೆ ಎಂದು ಅರ್ಥ. [illegible]
वान्डेमान धुमात ಎಂಬ ಪ್ರಮಾಣಕ
ಮಾಡಿದಾಗ [illegible] [illegible]ಗಳಲ್ಲಿ
ಸಾಧ್ಯವಾದ ವಸ್ತುಗಳು ಇರುವುದಿಲ್ಲ. ಅಂದರೆ
ವಸ್ತುಗಳು ಅಭಾವ ವಾಗುತ್ತದೆ. ಅಂತಹ
ಸಾಧ್ಯಭಾವ ವಾದುವ [illegible] ಒಂದು
ಧ್ಯಾನವು ಎಂಬ ಹೇಳುವು. ಇದರಿಂದ ಈ
ಧ್ಯಾನವು ಖಾತರಿಯಾಗಿದೆ ಅಂದರೆ ಖಾತ್ರಿ
ಎಂಬ [illegible] [illegible].

1992	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa
SEP	—	—	1	2	3	4	5	6	7	8	9	10	11	12	13	14	15	16	17	18	19
	20	21	22	23	24	25	26	27	28	29	30	—	—	—	—	—	—	—	—	—	—

अथोपमानखण्डम्

उपमितिकरणमुपमानम् । संज्ञा-संज्ञिसम्बन्धज्ञानमुपमितिः । तत्करणं सादृश्यज्ञानम् अतिदेशवाक्यार्थस्मरणम् - अवान्तरव्यापारः तथाहि — कश्चिद् गवयशब्दवाच्य (पदार्थ) मजानन् कुतश्चिद् आरण्यकपुरुषात् गोसदृशो गवय — इति श्रुत्वा वनं गतो वाक्यार्थं स्मरन् गोसदृशं पिण्डं पश्यति । तदनन्तरमसौ 'अयं गवयशब्दवाच्य' इत्युपमितिरुत्पद्यते ।

अथ शब्द खण्डम्

आप्तवाक्यं शब्दः। आप्तस्तु यथार्थवक्ता। वाक्यं पदसमूहः। यथा गामानयेति। शक्तं पदम्। अस्मात्पदादयमर्थो बोद्धव्य इतीश्वरसंकेतः शक्तिः॥

आकाङ्क्षा - योग्यता - सन्निधिश्च वाक्यार्थज्ञाने हेतुः।

पदस्य पदान्तरव्यतिरेकप्रयुक्तान्वयाननुभावकत्वमाकाङ्क्षा। अर्थाऽबाधो योग्यता। पदानामविलम्बेनोच्चारणं सन्निधिः। तथा च आकाङ्क्षादिरहितं वाक्यमप्रमाणं यथा = गौरश्वः पुरुषो हस्तीति न प्रमाणम् - आकाङ्क्षाविरहात्। वह्निना सिञ्चतीति न प्रमाणम् - योग्यताविरहात्। प्रहरे प्रहरेऽसहोच्चारितानि गामानयेत्यादिपदानि न प्रमाणम् सान्निध्याभावात्।

1992	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa
OCT	—	—	—	—	1	2	3	4	5	6	7	8	9	10	11	12	13	14	15	16	17
	18	19	20	21	22	23	24	25	26	27	28	29	30	31	—	—	—	—	—	—	—

वाक्यं द्विविधम् - वैदिकं - लौकिकं च
वैदिकमीश्वरोक्तत्वात्सर्वमेव प्रमाणम् |
लौकिकं त्वाप्तोक्तं प्रमाणम्
अन्यद् प्रमाणम् |

वाक्यार्थज्ञानं शाब्दज्ञानम् | तत्करणं तु शब्दः |
अयथार्थानुभवस्त्रिविधः - संशयः, विपर्यय - तर्कभेदात् |

एकस्मिन् धर्मिणि विरुद्धनानाधर्म वैशिष्ट्यावगाहि ज्ञानं संशयः |
यथा स्थाणुर्वा पुरुषो वेति |

मिथ्याज्ञानं विपर्ययः | यथा शुक्तौ रजतम् इति |

व्याप्यारोपेण व्यापकारोपस्तर्कः |
यथा वह्निर्न स्यात्तर्हि धूमोऽपि न स्यात्
स्मृतिरपि द्विविधा - यथार्था अयथार्था चेति | प्रमाजन्या यथार्था
अप्रमाजन्या अयथार्था |

17 A

23-6-2009

2 SEPTEMBER
Wednesday

1992	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa
AUG	–	–	–	–	–	–	1	2	3	4	5	6	7	8	9	10	11	12	13	14	15
	16	17	18	19	20	21	22	23	24	25	26	27	28	29	30	31	–	–	–	–	–

(17) सुखस्य लक्षणं

सर्वेषामनुकूलतया वेदनीयं सुखम्

अनन्यार्थतया, इष्टत्वप्रकारक ज्ञानविषयत्वं सुख सामान्य लक्षणं

(18) ~~दुःखस्य लक्षणं~~

प्रतिकूलतया वेदनीयं दुःखम्

अनिष्टत्वप्रकारक ज्ञानविषयत्वं दुःखत्वं।

(19) इच्छा = इच्छा कामः

20) क्रोधो द्वेषः (21) कृतिः प्रयत्नः

(22) विहितकर्मजन्यो धर्मः

(23) निषिद्धकर्मजन्यस्त्वधर्मः

(24) बुद्ध्यादयोऽष्टावात्ममात्रविशेषगुणाः

बुद्धि, इच्छा, प्रयत्ना नित्या अनित्याश्च।

नित्या ईश्वरस्य। अनित्या जीवस्य।

(2) संस्कारः

संस्कारस्त्रिविधाः — वेगो भावना स्थितिस्थापकश्चेति।

(1) वेगः पृथिव्यादि चतुष्टयमनो वृत्तिः

(2) अनुभवजन्या स्मृतिहेतुर्भावना आत्ममात्रवृत्तिः।

(3) अन्यथा कृतस्य पुनस्तदवस्थापादकः स्थितिस्थापकः — कटादि पृथिवी वृत्तिः

अथ कर्मलक्षण प्रकरणम्।

चलनात्मकं कर्म ।
ऊर्ध्वदेशसंयोगहेतुरुत्क्षेपणम् ।

अधोदेशसंयोगहेतुरपक्षेपणम् ।

शरीरस्य सन्निकृष्टसंयोगहेतुराकुञ्चनम्

विप्रकृष्टसंयोगहेतुः प्रसारणम्

अन्यत्सर्वं गमनम् ।

अथ सामान्यलक्षणप्रकरणम् ।

~~नि~~ नित्यमेकमनेकानुगतं सामान्यं

द्रव्यगुणकर्मवृत्ति । तद् द्विविधं ।

परापरभेदात् । परं सत्ता,
अपरं द्रव्यत्वादि ।

25-6-2001

1992 Su Mo Tu We Th Fr Sa Su Mo Tu We Th Fr Sa Su Mo Tu We Th Fr Sa
OCT — — — — 1 2 3 4 5 6 7 8 9 10 11 12 13 14 15 16 17
18 19 20 21 22 23 24 25 26 27 28 29 30 31 — — — — — — —

18

SEPTEMBER 5 Saturday

नित्यद्रव्यवृत्तयो व्यावर्तकाः विशेषाः।
(विशिष्यते वस्तु एभिः इति विशेषाः)
(विशेषाः = ಅಸಂಖ್ಯಾತ ಪ್ರಭೇದ,)

व्यावर्तकः व्यावृत्तिबुद्धिजनकः।
व्यावृत्तिर्नाम इतरभेदः। इतरभेदप्रकारक
ज्ञानजनकः व्यावर्तकः।

ಇತರರಿಂದ ಬೇರ್ಪಡಿಸಿ ತಿಳಿಯುವ
ಭೇದವನ್ನು ತನ್ನ ಆಶ್ರಯವಾದ ತಿಳಿಸಿಕೊಡುವ
ಧರ್ಮವು ವಿಶೇಷಗಳಿಂದ ಬೇರ್ಪಡಿಸಲ್ಪ-
ಡುವುದು. ವಿಶೇಷ ಎಂದರೆ ಭೇದವನ್ನು
ತಿಳಿಸಿಕೊಡುವ ಧರ್ಮವು।

SEPTEMBER 6 Sunday

समवायस्य लक्षणं
नित्यसम्बन्धः समवायः। अयुतसिद्धवृत्तिः
ययोर्द्वयोर्मध्ये एकमविनश्यदपराऽऽश्रितमेवाऽ-
वतिष्ठते तावयुतसिद्धौ। यथा
अवयवाऽवयविनौ, गुणगुणिनौ,
क्रियाक्रियावन्तौ, जाति-व्यक्ती,
विशेष-नित्यद्रव्ये चेति।

एकं घटं अविनश्यदवस्थस्य नाशामुद्दिता-
वस्थावान्तर नाम यावत् स्वनाशापन्नस्य

अपराश्रितमेव अवतिष्ठते - कपाल इव । आश्रित एव अवतिष्ठते तौ - घटकपाल इव अयुतसिद्धौ ।

प्रागभावस्य लक्षणम्

अनादिः सान्तः प्रागभावः । उत्पत्तेः पूर्वकार्यस्य । न विद्यते आदिः यस्य सः अनादिः । आदि शब्दस्य उत्पत्तिः इत्यर्थः अन्तेन सहितः सान्तः ।
लक्षणं तु - उत्पत्ति शून्यत्वे सति विनाशवत्वं प्रागभावस्य लक्षणं । घटप्रागभावे समन्वयः ।


घटप्रागभावस्य उत्पत्तिः नास्ति । एवं च उत्पत्ति शून्यत्वं घटप्रागभावे वर्तते इति प्रथम दलं । तथा घटोत्पत्त्यनन्तरं घटप्रागभावः नश्यति इति विनाशवत्वं घटप्रागभावे आयाति इति लक्षण समन्वयः ।

अनादित्वं प्रागभावस्य लक्षणं इत्येव उक्ते आत्मनि अतिव्याप्तिः । तस्य अनादित्वात् तत्परिहाराय द्वितीयदलं ।

आत्मनः नित्यत्वात् विनाशो नास्ति
एवं च विनाशवत्त्वरूप द्वितीयदलं
आत्मनि न आयाति इति न अतिव्याप्तिः

विनाशवत्त्वं प्रागभावस्य लक्षणं इत्येव उक्ते
घटादिषु अतिव्याप्तिः। तत्परिहारार्थं
प्रथमदलं। घटादीनां उत्पत्तिमत्वात्
उत्पत्तिशून्यत्वं नास्तीति न अतिव्याप्तिः।

[illegible]
[illegible]
[illegible]



प्रध्वंसाभावस्य लक्षणं

सादिरनन्तः प्रध्वंसः उत्पत्त्यनन्तरं
कार्यस्य। (आदिना सहितः सादिः। न विद्यते
अन्तः यस्य सः। अनादिः।

उत्पत्तिमत्वे सति विनाशाभाववत्वं
प्रध्वंसाभावलक्षणं। घटध्वंसे समन्वयः।

घटध्वंसः इदानीं भूतले जायते।

184

9 SEPTEMBER
Wednesday

1992	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa
AUG	—	—	—	—	—	—	1	2	3	4	5	6	7	8	9	10	11	12	13	14	15
	16	17	18	19	20	21	22	23	24	25	26	27	28	29	30	31	—	—	—	—	—

एवं च उत्पत्तिमत्वं घटध्वंसे आयाति तथा घटध्वंसः कदापि न नश्यति इति विनाशाभावः घटध्वंसे आयाति इति लक्षण समन्वयः।

प्रथमदलमात्र स्वीकारे घटादिषु अतिव्याप्तिः। तथाहि घटादिषु उत्पत्तिमत्वं वर्तते। तत्परिहारार्थं विनाशाभावरूप द्वितीयदलं देयं। एवं च घटादिषु विनाशाभावः नास्ति इति न अतिव्याप्तिः।

द्वितीयदलमात्र स्वीकारे परमाण्वादिषु अतिव्याप्तिः। तेषां अपि नित्यत्वात्। तत्परिहारार्थं प्रथमदलं।

परमाण्वादि नित्यपदार्थानां अनादित्वात् न तत्र उत्पत्तिमत्व इति न अतिव्याप्तिः।

अत्यन्ताभावस्य लक्षणं। 185

त्रैकालिक संसर्गावच्छिन्न प्रतियोगिता को अत्यन्ताभावः। यथा भूतले घटो नास्तीति कालत्वव्यापकोऽभावः अत्यन्ताभावः।

शशविषाणात्यन्ताभावे समन्वयः।
यत्र कालत्वं, भूतकाले, वर्तमानकाले भविष्यत्काले च कालत्वं। तत्र शशविषाणं नास्ति। एवं च कालत्व व्यापकः यः अभावः शशविषाणाभावः। व्यापकत्वं अभावे वर्तते इति लक्षण समन्वयः।

कालवृत्ति अभावः अत्यन्ताभावः इत्येव अलं। कालत्व व्यापकत्वं कुतः अत्यन्ताभावे दीयते इति न च शङ्क्यं। तथा सति प्रागभावे प्रध्वंसाभावे च अतिव्याप्तिः। तेषां अपि कालवृत्तित्वात्। तत्परिहारार्थं अभावे कालत्वव्यापकत्व रूप विशेषणं देयं।

प्रागप्रध्वंसाभावयोः च कालत्वव्यापकत्वं नास्ति इति न अतिव्याप्तिः।

29-6-2001।

अन्योन्याभावस्य लक्षणं

तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकोऽन्योन्याभावः। यथा घटः पटो नेति।

(सः आत्मा यस्य सः तदात्मा। तस्य भावः तादात्म्यं)।

घटः पटो न इत्यत्र घटे पटप्रतियोगिक तादात्म्यं नास्ति इति पटतादात्म्यप्रतियोगिकाभावः घटे अस्ति। एवमेव घटतादात्म्यप्रतियोगिकाभावः पटे अस्ति इति घटे पटभेदः पटे घटभेदः वर्तते। स एव अन्योन्याभावः।

ಘಟ ಪಟ ತಾದಾತ್ಮ್ಯವಾಗಲು ಅಸಾಧ್ಯ
ವಿರುದ್ಧವಾಗಿರುತ್ತದೆ. ಏಕೆಂದರೆ ಘಟ ಪಟ
ತಾದಾತ್ಮ್ಯವು ಇಲ್ಲದಿದ್ದರೆ ಭಿನ್ನವಾಗಿರುವ
ಘಟವು ತಾದಾತ್ಮ್ಯವಾಗಲಾಗುತ್ತದೆ. ಈ
ಘಟವು ಅಲ್ಲಿ ಎಲ್ಲಾ ಕಡೆಗೆ ಇರುತ್ತದೆ
ಎಂದರೆ ಘಟದ ನಾಶವಾಗುವ ಅವಸ್ಥೆ
[illegible] ವರೆಗೆ ಇರುತ್ತದೆ. ಎಂದರೆ
ಘಟವು ತಾದಾತ್ಮ್ಯವನ್ನು ಬಿಟ್ಟು

1992	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa
OCT	—	—	—	—	1	2	3	4	5	6	7	8	9	10	11	12	13	14	15	16	17
	18	19	20	21	22	23	24	25	26	27	28	29	30	31	—	—	—	—	—	—	—

ಇರಬಾರದು. ಪೀಠಕ್ಕೆ ಕೇವಲಾದ್ವೈತ
ಸಂಬಂಧ ಕಲ್ಪಿಸಿದೆ ಎಂದರೆ ಪೀಠದ
ನಾಶವಾಗಿದೆ ಎಂದರ್ಥ. ಹೀಗೆ ನನ್ನ
ನಾಶವಾಗಿವೆ ಪಂಡಿತರವರಿಗೆ ಕೇವಲ-
ದ್ವೈತವನ್ನು ಶೃಂಗೇರಿಯೊಂದಿಗೆ ಪೀಠವು
ಇರುವುದರಿಂದ ಈ ಪೀಠ ಮತ್ತು ಕೇವಲ
ದ್ವೈತಗಳಿಗೆ ಅಂಟುನೆ ಸಿದ್ಧ ಎಂದು
ಹೇಳಬಹುದು.

2-7-2001

14 SEPTEMBER Monday

1992	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa
AUG	–	–	–	–	–	–	1	2	3	4	5	6	7	8	9	10	11	12	13	14	15
	16	17	18	19	20	21	22	23	24	25	26	27	28	29	30	31	–	–	–	–	–

निधाय हृदि विश्वेशं विधाय गुरुवन्दनम्
बालानां सुखबोधाय क्रियते तर्कसंग्रहः।

क्रियते इत्यत्र कृञ् धातोः कृति इत्यर्थः।
तदुत्तर आख्यात प्रत्ययस्य (विषयत्व)
आश्रयत्व इत्यर्थः। तस्य आख्यातस्य
लट्त्वात् वर्तमानकालिनत्व म्यार्थः।

वर्तमानकालीनत्वस्य आश्रयता सम्बन्धेन
कृञ् धात्वर्थ कृतौ अन्वयः। कृतेः निरूपितत्व
संबन्धेन आख्यातार्थ विषयत्वे अन्वयः।
विषयत्वस्य (आश्रयता सम्बन्धेन) स्वरूप
सम्बन्धेन तर्कसंग्रहे अन्वयः।

तर्काणां संग्रहः :- तर्क्यन्ते इति तर्काः।
तर्क शब्दस्य पदार्थाः। संग्रह शब्दस्य
संक्षिप्त स्वरूप कथनं इत्यर्थः। तर्काणां
इत्यत्र षष्ठ्याः विषयता इत्यर्थः। पदार्थानां
आधेयता सम्बन्धेन षष्ठ्यर्थ विषयतायां
अन्वयः। विषयतायाः निरूपकत्व संबन्धेन
संग्रहशब्दार्थ संक्षिप्तस्वरूप कथने अन्वय

एवं च पदार्थनिष्ठ विषयता निरूपक संक्षिप्त स्वरूपकथनं वर्तमान कलीनत्वाश्रय कृतिनिरूपित विषयत्वाश्रयः।

अत्र मया इति अध्याहारः। मया इत्यत्र अस्मद् शब्दस्य अस्मद्ः इत्यर्थः। मया इत्यत्र तृतीयायाः समवेतत्व अर्थः। अस्मदस्य निरूपितत्व सम्बन्धेन तृतीयार्थ समवेतत्वे अन्वयः।

समवेतत्वस्य आश्रयता सम्बन्धेन कृञ् धात्वर्थ कृतौ अन्वयः। एवं च पदार्थनिष्ठ विषयता निरूपक संक्षिप्तस्वरूप कथनं, अस्मद् निरूपित समवेतत्वाश्रय वर्तमानकालीनत्वाश्रय कृतिनिरूपित विषयत्वाश्रयः।
अत्र बालः नाम अधीत साहित्य व्याकरणाः अनधीत न्यायशास्त्रं यैः ते बालाः। बालानां इत्यत्र षष्ठ्याः समवेतत्वं अर्थः। बालानां निरूपितत्व सम्बन्धेन षष्ठ्यर्थ समवेतत्वे अन्वयः। समवेतत्वस्य आश्रयता सम्बन्धेन सुखबोधे अन्वयः

4-7-2001

१० 16 SEPTEMBER Wednesday

1992	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa
AUG	—	—	—	—	—	—	1	2	3	4	5	6	7	8	9	10	11	12	13	14	15
	16	17	18	19	20	21	22	23	24	25	26	27	28	29	30	31	—	—	—	—	—

सुखबोधाय इत्यत्र सुखबोधशब्दस्य अनायासपूर्वक पदार्थतत्त्वज्ञानं इत्यर्थः सुखबोधाय इत्यत्र चतुर्थ्याः प्रयोजकत्वं इत्यर्थः। अनायासपूर्वक पदार्थतत्त्व-ज्ञानस्य निरूपितत्व सम्बन्धेन चतुर्थ्यर्थ प्रयोजकत्वे अन्वयः।

प्रयोजकत्वस्य आश्रयता संबन्धेन कृञ् धात्वर्थ कृतौ अन्वयः।

गुरुनिष्ठ विशेष्यता निरूपक संक्षिप्त रूपकथन कालनिरूपित समवेतत्वा श्रय सुखबोधनिरूपित प्रयोजकत्वा श्रय अन्नंभट्ट निरूपित समवेतत्वा श्रय वर्तमानकालीनत्वाश्रयः या कृतिः तादृश कृति निरूपित विषयत्वाश्रयः

एवं च गुरूणां इत्यत्र गुरोः आधेयता संबन्धेन षष्ठ्यर्थ विशेष्यतायां अन्वयः विशेष्यतायाः निरूपकत्व सम्बन्धेन बन्धेन शब्दार्थैकदेश स्वावधिकोत्कृष्टत्व प्रकारक ज्ञाने अन्वयः।

1992	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa
OCT	—	—	—	—	1	2	3	4	5	6	7	8	9	10	11	12	13	14	15	16	17
	18	19	20	21	22	23	24	25	26	27	28	29	30	31	—	—	—	—	—	—	—

स्वाबाधिको कृष्टत्वप्रकारक ज्ञानानुकूल
व्यापारस्य आधेयतासंबन्धेन वन्दनम्
इत्यत्र द्वितीयार्थ विषयतायां अन्वयः।
विषयतायाः निरूपकत्व संबन्धेन विधान
शब्दार्थ कृतौ अन्वयः। कृतेः
स्वनिष्ठप्रतियोगितानिरूपकत्व सम्बन्धेन
ल्यप् प्रत्ययार्थैकदेश ध्वंसे अन्वयः

ध्वंसाधिकरणकालवृत्तित्वस्य आश्रयता
संबन्धेन कृञ् धात्वर्थ कृतौ अन्वयः।
गुरु-6-वन्दन-2-निधाय-स्वनि-ध्वंसे कृञ्

निधाय हृदि विश्वेशं

निधाय नि इत्युपसर्गपूर्वक धाञ् धातोः
निधान इत्यर्थः। निधानं नाम आधेयत्व
प्रकारक आहार्य भ्रमः इति तात्पर्यार्थः।
निधाय इत्यत्र ल्यप् प्रत्ययस्य उत्तरकालीनत्वं इत्यर्थः।
हृदि इत्यत्र सप्तम्याः अधिकरणता
इत्यर्थः। हृत् शब्दस्य मनः इत्यर्थः।
विश्व शब्दस्य समस्त जगत् इत्यर्थः

5-7-2001

1992

18 SEPTEMBER
Friday

1992	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa
AUG	–	–	–	–	–	–	1	2	3	4	5	6	7	8	9	10	11	12	13	14	15
	16	17	18	19	20	21	22	23	24	25	26	27	28	29	30	31	–	–	–	–	–

समस्त जगतः आधेयता सम्बन्धेन षष्ठ्यर्थ नियम्यतायां अन्वयः। नियम्यतायाः निरूपितत्व संबन्धेन ईशशब्दार्थैकदेश नियामकतायां अन्वयः नियामकतावतः आधेयता संबन्धेन द्वितीयार्थ विशेष्यतायां अन्वयः

विशेष्यतायाः निरूपकत्व सम्बन्धेन धाञ्‌ धात्वर्थ आहार्यभ्रमे अन्वयः। मनसः आधेयता सम्बन्धेन सप्तम्यर्थ आधिकरणतायां अन्वयः। आधिकरणतायाः निरूपितत्व सम्बन्धेन धाञ्‌ धात्वर्थैकदेश आधेयत्वे अन्वयः।
आहार्यभ्रमस्य स्वानिष्ठप्रतियोगिता निरूपकत्व सम्बन्धेन ल्यप् प्रत्ययार्थैकदेश ध्वंसे अन्वयः। अत्रकालीनत्वस्य आश्रयता सबन्धेन कृञ्‌ धात्वर्थ कृतौ अन्वयः

॥विश्व-6-ईश-2-आहार्य-हृत-7-आधेयत्व-आहार्य-ल्यप-कृतौ॥

एवं च समस्त जगन्निष्ठ नियम्यता निरूपित
नियामकतावन्निष्ठ विशेष्यता निरूपकः
यः मनोनिष्ठाधिकरणता निरूपिताधेयत्व
प्रकारक आहार्यभ्रमः तादृश
आहार्यभ्रमनिष्ठ प्रतियोगिता निरूपक
ध्वंसाधिकरण कालवृत्तित्वाश्रया या,

गुरुनिष्ठविशेष्यता निरूपक स्वावधिको
त्कृष्टत्व प्रकारक ज्ञानानुकूल व्यापारनिष्ठ
प्रतियोगिता निरूपक ध्वंसाधिकरण
कालवृत्तित्वाश्रया या बालनिरूपित
समवेतत्वाश्रय सुखबोध निरूपित

प्रयोज्यत्वाश्रया या
अन्नमदृष्ट निरूपित समवेतत्वाश्रया
वर्तमानकालीनत्वाश्रय कृति निरूपित
विषयत्वाश्रयः।

194

21 SEPTEMBER Monday

7-7-3

1992	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa
AUG	–	–	–	–	–	–	1	2	3	4	5	6	7	8	9	10	11	12	13	14	15
	16	17	18	19	20	21	22	23	24	25	26	27	28	29	30	31	–	–	–	–	–

गन्धः अस्यां अस्तीति विग्रहः
गन्धवतीति समासः। अत्र शाब्दबोधस्तु :-

अस्यां इत्यत्र इदं शब्दस्य पृथिवी इत्यर्थः। सप्तम्याः अधिकरणता इत्यर्थः
अस् धातोः आधेयत्वं इत्यर्थः।

अस्ति इत्यत्र (तिप् प्रत्यय) आख्यातप्रत्ययस्य आश्रयत्वं इत्यर्थः।
इदं पदार्थस्य आधेयता सम्बन्धेन सप्तम्यर्थ अधिकरणतायां अन्वयः
अधिकरणतायाः निरूपितत्व सम्बन्धेन अस् धात्वर्थ आधेयत्वे अन्वयः
आधेयत्वस्य निरूपितत्व सम्बन्धेन तिप् प्रत्ययार्थे आश्रयत्वे अन्वयः।
आश्रयत्वस्य आश्रयता संबन्धेन गन्धे अन्वयः।

इदं - 7 - अस् - तिप् - गन्धे
एवं च गन्धः पृथिवीनिष्ठाधिकरणता निरूपित आधेयत्वनिरूपित आश्रयत्वाश्रयः इति विग्रहवाक्येन बोधः।

1992	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa
OCT	—	—	—	—	1	2	3	4	5	6	7	8	9	10	11	12	13	14	15	16	17
	18	19	20	21	22	23	24	25	26	27	28	29	30	31	—	—	—	—	—	—	—

SEPTEMBER 22
Tuesday

गन्धवती पृथिवी :—
गन्धवतीत्यत्र प्रथमायाः
विशेषण वाचक पदोत्तरत्वात् विशेषण
वाचक पदोत्तर विभक्तीनां अभेदमात्र
परत्व इति नियमानुसारेण अभेदः
इत्यर्थः
गन्धवती शब्दस्य गन्धनिष्ठा
धेयता निरूपिताधिकरणतावती इत्यर्थः
अधिकरणतावत्यः स्वनिष्ठ प्रतियोगिता
निरूपकत्व संबन्धेन प्रथमार्थे
अभेद अन्वयः। अभेदस्य आश्रयता
संबन्धेन पृथिव्यां अन्वयः।
एवं च पृथिवी गन्धनिष्ठाधेयता
निरूपिताधिकरणतानिष्ठ प्रतियो
गितानिरूपकाभेदाश्रया इति।

१७६

23 SEPTEMBER
Wednesday

1992	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa
AUG	–	–	–	–	–	–	1	2	3	4	5	6	7	8	9	10	11	12	13	14	15
	16	17	18	19	20	21	22	23	24	25	26	27	28	29	30	31	–	–	–	–	–

तत्र इत्यस्य तत् शब्दस्य पृथिव्यादि
समुदायो अर्थः । त्रल् प्रत्ययस्य
घटकत्वं अर्थः । पृथिव्यादि समु
दायस्य निरूपितत्वं संबन्धेन
घटकत्वे अन्वयः । घटकत्वस्य
आश्रयता संबन्धेन पृथिव्यां
अन्वयः । पृथिव्यादि समुदाय
निरूपित घटकत्वाश्रया पृथिवी

द्विविधे यस्याः सा द्विविधा ।

यस्याः इत्यत्र यत् शब्दस्य पृथ्वी
इत्यर्थः । तत्र षष्ठ्याः आधेयत्वं
अर्थः । विधे शब्दस्य विभाजक
धर्मौ इत्यर्थः । द्वि शब्दस्य द्वित्व
सङ्ख्या विशिष्टौ अर्थः । द्वे इत्यत्र
प्रथमायाः अभेदो अर्थः । द्वित्व
सङ्ख्या विशिष्टयोः स्वनिष्ठप्रति
योगिता निरूपकत्व संबन्धेन
प्रथमार्थे अभेदे अन्वयः । अभेदस्य
आश्रयता संबन्धेन विधे शब्दार्थे
विभाजकधर्मयोः अन्वयः

पृथिव्याः निरूपितत्व संबन्धेन
षष्ठ्यर्थे आधेयत्वे अन्वयः।
आधेयत्वस्य आश्रयता संबन्धेन
विभाजक धर्मयोः अन्वयः। एवं च
द्वित्वसंख्यानिरूपित विभाजक धर्मौ
पृथिवी निरूपित आधेयत्वाश्रयौ इति
विग्रह वाक्येन बोधः।
विग्रहवाक्येन यादृशो बोधः
जायते, समास वाक्येन तद्विपरीत
बोधः जायते।
विपरीतत्वञ्च विशेषण विशेष्यभावा
पेक्षया इति नियमानुसारेण

1992	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa
OCT	—	—	—	—	1	2	3	**4**	5	6	7	8	9	10	**11**	12	13	14	15	16	17
	18	19	20	21	22	23	24	**25**	26	27	28	29	30	31	—	—	—	—	—	—	—

199

SEPTEMBER 26
Saturday

पृथिवी दिवस संख्या निश्चित

१८७ 28 SEPTEMBER Monday

1992 Su Mo Tu We Th Fr Sa Su Mo Tu We Th Fr Sa Su Mo Tu We Th Fr Sa
AUG — — — — — — 1 2 3 4 5 6 7 8 9 10 11 12 13 14 15
16 17 18 19 20 21 22 23 24 25 26 27 28 29 30 31 — — — — —

परमात्मा सर्वज्ञः सर्वकर्तृत्वात्
७०७०२ पृ० पङ्क्ति कर्ता सः

यत् ज्ञानवान् इति सामान्यमुखी व्याप्ति।।

हेतुः सर्वकर्तृत्वं। हेतुतावच्छेदकं कर्तृत्वे सर्वविषयकत्वं।

हेतुतावच्छेदकस्य व्यापकीभूतः धर्मः कर्तृत्वे एकदेशविषयकत्वं

तदवच्छिन्नस्य नाम एकदेशकर्तृत्वस्य

सहचारावच्छेदक व्यापक धर्मावच्छिन्नो व्याप्ति।।

साध्यं सर्वविषयक ज्ञानं साध्यतावच्छेदकं ज्ञाने सर्वविषयकत्वं।

तद् व्यापकीभूत धर्मः ज्ञाने एकदेश विषयकत्वं।

OCT – – – – – 1 2 3 4 5 6 7 8 9 10 11 12 13 14 15 16 17
18 19 20 21 22 23 24 25 26 27 28 29 30 31 – – – – – – – –

SEPTEMBER 29
Tuesday

तदवच्छेदेन एकदेशस्नानं तेन

आप्ति = एकदेश कर्तृत्वस्य ।

सर्वकर्तृತ್ವವನ್ನು ಪ ಹೇಳದೆ ಏಕದೇಶದಲ್ಲಿ ಮಾತ್ರ

ಇದು ಅವ್ಯಾಪ್ತಿ ಎಂಬಲ್ಲಿ ಆಪ್ತಿ ಇಲ್ಲಿ ವಿವಕ್ಷಿತ

ಸ್ನಾನ ಶ್ರೀಮದ್ ಸಿದ್ಧಾಂತದಿಂದ

ಅವಿಸಂವಾದ ಬರಲೇಬೇಕಿಲ್ಲ.